तत् त्वं पूषन् अपावृणु
केन्द्रीय विद्यालय संगठन

# केन्द्रीय विद्यालय संगठनम्

## KENDRIYA VIDYALAYA SANGATHAN

## हैदराबाद् संभागः / HYDERABAD REGION .

# अध्ययनसामग्री । CBSE - 2023 - 24. ( CODE - 122 )

## दशमी कक्षाया: संस्कृत - छात्राध्ययनसामग्री , 2023 - 2024.



योऽनूचानः स नो महान्

## मार्गनिर्देशकः
## डा. डी. मञ्जुनाथः , उपायुक्तः ,

केन्द्रीय विद्यालय संगठनम् KENDRIYA VIDYALAYA SANGATHAN
हैदराबाद् संभागः / HYDERABAD REGION .

## समायोजकः
## श्री. निशिकान्त अगर्वालः , प्राचार्यः ,
केन्द्रीय विद्यालयः नं - 2 , विशाखपट्णम् .

## मख्यसम्पादकः
### श्री. चे. वेङ्कट रामय्यः ,
प्रशिक्षित - स्नातक - शिक्षकः , केन्द्रीय विद्यालयः नं - 1. उप्पल् , हैदराबाद् .

## संस्कृतसम्पादकसमितेः सदस्याः

| | | | |
|---|---|---|---|
| 1. | श्री. कृष्ण कुमारः | प्रशिक्षित - स्नातक - शिक्षकः | के. वि. , गुण्टूर् , षि. 1. |
| 2. | श्री. रमेश बाबु | प्रशिक्षित - स्नातक - शिक्षकः | के. वि. , गुण्टूर् , षि. 2. |
| 3. | श्री. एस्. बि. टि. चार्युलु | प्रशिक्षित - स्नातक - शिक्षकः | के. वि. , पिकेलट् . |
| 4. | श्री. जगदीश यादवः | प्रशिक्षित - स्नातक - शिक्षकः | के. वि. , स्टील् प्लान्ट् . |
| 5. | श्री. जे. एन्. आचार्यः | प्रशिक्षित - स्नातक - शिक्षकः | के. वि. , एन्. पि. ए. |
| 6. | श्रीमती. कोमल वैष्णव | प्रशिक्षित - स्नातक - शिक्षिका | के. वि. , काञ्चन बाग् . |
| 7. | श्री. जि. कृष्णः | प्रशिक्षित - स्नातक - शिक्षकः | के. वि. नं - 1, एस्. वि. एन्. |

केन्द्रीय विद्यालय संगठन
क्षेत्रीयकार्यालय , हैदराबाद्
Kendriya Vidyalaya Sangathan
Regional Office , Hyderabad.

तत् त्वं पूषन् अपावृणु
केन्द्रीय विद्यालय संगठन

## MESSAGE FROM DEPUTY COMMISSIONER

It gives me immense pleasure to publish the Sanskrit Study Material for class X. I am sure that the support material will definitely be of great help to the class X Sanskrit students of all Kendriya Vidyalayas of our region.

This Students' Support Material has been prepared to improve their academic performance. This is a product of the combined efforts of a team of dedicated and experienced teachers with expertise in their subjects. This materials designed to supplement the NCERT text book.

The support material contains all the important aspects required by the students. Care has been taken to include the latest syllabus , summary of all the chapters , Grammar parts and sample question papers.it covers all essential components that are required for quick and effective revision of the subject.

I would like to express my sincere gratitude to the in-charge Principal and all the teachers who have persistently striven for the preparation of this study material. Their selfless Contribution in making this project successful is commendable.

" An ounce of practice is worth tons of knowledge " students will make use of this material meticulously to reap the best out of this effort.

With Best Wishes

( Dr. D. Manjunaathan )
Deputy Commissioner

तत् त्वं पूषन् अपावृणु
केन्द्रीय विद्यालय संगठन

विद्ययाऽमृतमश्नुते ।

'या भाष्यते' सा भाषा । विश्वे सर्वासां भाषाणां संस्कृत - भाषा जननी इति निश्चप्रचम् एव । संस्कृत - भाषायाः अध्ययनेन छात्राः सर्वे भारतीयां संस्कृतिं अवगन्तुं शक्नुवन्ति । एवं भारतीय - जीवनविधानं , दैनन्दिनजीवने संस्कृत - सूक्तीनाम् आवश्यकतां च स्वयं अवगच्छन्ति । महानयं प्रमोदस्य विषयः यत् " बालानां सुखबोधाय " विशिष्य दशमीकक्षायाः छात्राणां कृते संरचितेयं CBSE संस्थायाः नूतन पाठ्यक्रमानुसारं छात्राध्यायन - सहायक - सामग्री नवीनतमप्रश्नपत्रम् आधृत्य सरलशैल्या विलसति । CBSE - 23 - 24 द्वारा अशीति ( 80 ) अङ्कानां कृते इदं प्रश्नपत्रं चतुर्षु भागेषु विभक्तम् ।

CBSE - 23 - 24 प्रश्नपत्रस्य प्रारूपम् ( Blue print ) अनुसृत्य विनिर्मिता इयं अध्ययनसामग्री । यथा :-

| | | | | |
|---|---|---|---|---|
| " क " खण्डः | : | अपठित - अवबोधनम् | 10 | अङ्काः |
| " ख " खण्डः | : | रचनात्मकं कार्यम् | 15 | अङ्काः |
| " ग " खण्डः | : | अनुप्रयुक्तव्याकरणम् | 25 | अङ्काः |
| " घ " खण्डः | : | पठित - अवबोधनम् | 30 | अङ्काः |

अत्र अतिलघूत्तरात्मकाः प्रश्नाः , लघूत्तरात्मकाः प्रश्नाः , दीर्घोत्तरात्मकाः प्रश्नाः , निबन्धात्मकाः प्रश्नाः , बहुविकल्पात्मकाः प्रश्नाः ( MCQ's ) च सन्ति ।

अत्र न केवलं प्रश्नोत्तराणि , अपितु अभ्यासार्थं प्रश्नाः अपि प्रदत्ताः । अस्यां सहायकसामग्र्यां प्रत्येकस्य प्रश्नस्य उत्तरं कथं लेखनीयम् इत्यपि संसूचितम् । अत्र व्याकरणबिन्दूनामुपरि विशेषावधानं प्रदत्तम् । हैदराबाद् सम्भागस्य दशमीकक्षायाः छात्रेभ्यः इयं सहायकसामाग्री कल्पतरुरिव वाञ्छिततफलप्राप्त्यै सहकरोतीति संभाव्यते ।

अवसरेऽस्मिन् 2023 - 24 विद्यासंवत्सरस्य प्रारम्भे एव छात्रहिताय अस्याः सामग्र्याः निर्माणार्थं मार्गदर्शनं कृतवद्भ्यः केन्द्रीय विद्यालय संगठनम् , हैदराबाद् सम्भागस्य उपायुक्तेभ्यः श्रीमद्भ्यः डा. डी. मञ्जुनाथः महोदयेभ्यः संस्कृतसमितेः पक्षतः नमांसि भूयांसि ।

अस्याः अध्ययन - सामग्र्याः निर्माणे सहयोगं दत्तवद्भ्यः समायोजकेभ्यः केन्द्रीय विद्यालयः नं - 2 , नौसेना बाग् , विशाखपट्णम् . प्राचार्येभ्यः श्री. निशिकान्त अगरवाल महोदयेभ्यः अपि संस्कृतसमितेः पक्षतः कार्तज्ञं विनिवेद्यते ।

सर्वे छात्राः परीक्षायां अनया संस्कृतसामग्र्या आत्मविश्वासेन शुद्धोत्तरलेखने समर्थाः भवेयुरिति नः विश्वासः।

" सर्वे जनाः सुखिनो भवन्तु "

संस्कृतसम्पादकसमितेः सदस्याः

## विषयसूची :- CBSE 23 - 24 अनुसारं खण्डासारं प्रश्नानुसारं च पाठ्यबिन्दवः अध्ययनसामग्री च |

### " क " भागः अपठित - अवबोधनम् - 10 अङ्काः

| प्रश्नः | विषयः | अङ्काः | संख्या |
|---|---|---|---|
| 0 | अभ्यासप्रष्णपत्रम् उत्तराणि च \| CBSE 2022 - 23 Question Paper & Key | 80 | |
| 1 | 80 - 100 अपठित - गद्यांशः प्रश्नाः च -<br>I. एकपदेन उत्तरत - 1 x 2 = 2. II. पूर्णवाक्येन उत्तरत - 2 x 2 = 4.<br>III. उचितं शीर्षकं लिखत - 1. IV. भाषिकं कार्यम् - 1 x 3 = 3.<br>** IV. भाषिकं :- कर्तृपदं / क्रियापदं / विशेषण / विशेष्य / पर्याय / विलोमपदम्<br>बहुविकल्पात्मकाः / MCQs | 10 | 6 |

### " ख " भागः रचनात्मकं कार्यम् - 15 अङ्काः

| प्रश्नः | विषयः | अङ्काः | संख्या |
|---|---|---|---|
| 2 | सङ्केताधारितम् औपचारिकपत्रम् अथवा अनौपचारिकं पत्रलेखनम् | ½ x 10 = 5 | 20 |
| 3 | चित्राधारितं वर्णनम् अथवा अनुच्छेदलेखनम् | 1 x 5 = 5 | 22 |
| 4 | हिन्दीभाषायाम् आङ्ग्लभाषायां वा लिखितानां पञ्चसरलवाक्यानां संस्कृतेन अनुवादः | 1 x 5 = 5 | 25 |

### " ग " खण्डः अनुप्रयुक्त - व्याकरणम् - 25 अङ्काः

| प्रश्नः | विषयः | अङ्काः | संख्या |
|---|---|---|---|
| 5 | सन्धिकार्यम् :- * व्यञ्जनसन्धिः :- वर्गीय - प्रथमवर्णस्य तृतीयवर्णे परिवर्तनम् ,<br>प्रथमवर्णस्य पञ्चमवर्णे परिवर्तनम् 2 अङ्कौ<br>* विसर्गसन्धि :- विसर्गस्य उत्वम् , रत्वं , विसर्गलोपः ,<br>विसर्गस्य स्थाने स् , श् , ष् 2 अङ्कौ | 1 x 4 = 4 | 34 |
| 6 | समासाः :- * तत्पुरुषः - विभक्तिः * बहुव्रीहिः ( 1 + 1 = 1 + 1 )<br>* अव्ययीभावः (अनु , उप , सह , निर् , प्रति , यथा )<br>* द्वन्द्वः ( केवलं इतरेतरः ) बहुविकल्पात्मकाः / MCQs | 1 x 4 = 4 | 41 |
| 7 | प्रत्ययाः :- * तद्धिताः :- मतुप् , ठक् , त्व , तल् ( 3 + 1 )<br>* स्त्रीपत्ययौ :- टाप् , ङीप् बहुविकल्पात्मकाः / MCQs | 1 x 4 = 4 | 51 |
| 8 | वाच्यम् :- केवलं लट् लकारे ( कर्तृ - कर्म - क्रिया ) बहुविकल्पात्मकाः / MCQs | 1 x 3 = 3 | 55 |
| 9 | समयः :- अङ्कानां स्थाने शब्देषु समयलेखनम् ( सामान्य - सपाद - सार्ध - पादोन )<br>लघूत्तरात्मकाः | 1 x 4 = 4 | 61 |
| 10 | अव्ययपदानि :- उच्चैः , च , श्वः , ह्यः , अद्य , अत्र - तत्र यत्र - कुत्र , इदानीम् ,<br>( अधुना , सम्प्रति , साम्प्रतम् ) यदा , तदा , कदा , सहसा , वृथा , शनैः ,<br>अपि , कुतः, इतस्ततः , यदि - तर्हि , यावत् - तावत् लघूत्तरात्मकाः | 1 x 3 = 3 | 63 |
| 11 | अशुद्धि - संशोधनम् :- (वचन - लिङ्ग - पुरुष - लकार - विभक्ति - दृष्ट्या संशोधनम् ) बहुविकल्पात्मकाः / MCQs | 1 x 3 = 3 | 68 |

*

## “ घ ” भागः पठित - अवबोधनम् - 30 अङ्काः

| प्रश्नः | विषयः | अङ्काः | संख्या |
|---|---|---|---|
| 12 | पठित - गद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम् प्रश्नाः च ( गद्यपाठाः :- 2 , 5 & 8 ) | 5 | 70 |
| 13 | पठित - पद्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम् प्रश्नाः च ( पद्यपाठाः :- 1 , 6 , 9 & 12 ) | 5 | 79 |
| 14 | पठित - नाट्यांशम् अधिकृत्य अवबोधनात्मकं कार्यम् प्रश्नाः च ( नाट्यांश पाठाः :- 4 , & 7 ) | 5 | 98 |
| 15 | प्रश्ननिर्माणम् :- वाक्येषु रेखांकित - पदानि अधिकृत्य चतुर्णां प्रश्नानां निर्माणम् । | 4 | 106 |
| 16 | श्लोकान्वयः / एकस्य श्लोकस्य संस्कृतेन भावार्थलेखनम् । | 4 | 111 |
| 17 | घटनाक्रमानुसारं कथालेखनम् । | 4 | 121 |
| 18 | प्रसङ्गानुकूलं समानार्थकपदचयनम् ( पाथाधारित - बहुविकल्पात्मकाः प्रश्नाः ) / MCQs | 3 | 122 |
| | अभ्यास - प्रश्नपत्रम् / आदर्श - प्रश्नपत्रम् - 2023 - 24 उत्तराणि च | 80 | 127 |

CBSE द्वारा 2023 - 24. दशमश्रेण्यै निर्धारितानि पाठ्य - पुस्तकानि :-

1. “ शेमुषी ’ - संस्कृत - पाठ्यपुस्तकम् - भाग 2 ” । ( प्रकाशनम् - रा. शै. अनु. प्र. परि. द्वारा )
2. “ अभ्यासवान् भव ’ - द्वितीयो भागः ” व्याकरणपुस्तकम् ( प्रकाशनम् - रा. शै. अनु. प्र. परि. द्वारा )
3. “ व्याकरणवीथिः ” व्याकरणपुस्तकम् ( प्रकाशनम् - रा. शै. अनु. प्र. परि. द्वारा )

**************************************************************************************************************

अभ्यासप्रश्नपत्रम् 2022 - 23 CBSE Question Paper - 10th , SANSKRIT 122. Time : 3 hrs Marks : 80

**************************************************************************************************************

सामान्य - निर्देशाः :- * कृपया सम्यक्तया परीक्षणं कुर्वन्तु यत् अस्मिन् प्रश्नपत्रे 18 प्रश्नाः सन्ति |

- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः |
- अस्य प्रश्नपत्रस्य पठनाय 15 निमेषाः निर्धारिताः सन्ति | अस्मिन् समये केवलं प्रश्नपत्रं पठनीयम् उत्तरपुस्तिकायां च किमपि न लेखनीयम् |

अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति :-

| | | | |
|---|---|---|---|
| खण्डः “ क ” | : अपठित - अवबोधनम् | 10 | अङ्काः |
| खण्डः “ ख ” | : रचनात्मकं कार्यम् | 15 | अङ्काः |
| खण्डः “ ग ” | : अनुप्रयुक्तव्याकरणम् | 25 | अङ्काः |
| खण्डः “ घ ” | : पठित - अवबोधनम् | 30 | अङ्काः |

******************************************************************************************************************

### खण्डः “ क ” ( SECTION A ) अपठित - अवबोधनम् 10 अङ्काः :

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

अस्माकं देशः प्राचीनकालादेव प्राकृतिक - पर्यावरणस्य पोषकः | वैदिककाले यद्यपि पर्यावरणस्य प्रदूषणस्य समस्या नासीत् तथापि वेदेषु स्थाने - स्थाने ऋषीणां पर्यावरणविषयकं चिन्तनं दृश्यते | अद्य पर्यावरण - प्रदूषणं संसारस्य भीषणतमा समस्या वर्तते , परं जनाः अस्याः गाम्भीर्यं न अनुभवन्ति | पर्यावरणं रक्षणीयं वृक्षाः रोपणीयाः रक्षणीयाः च इति शृण्वन्तः उद्घोषयन्तः अपि वयं प्रतिदिनं तेषां कर्तनं पश्यामः | ‘ प्लास्टिक् ’ इति रसायनेन निर्मितवस्तूनि पर्यावरणाय हानिकराणि इति जानन्तः अपि जनाः एतेषां प्रयोगं बाहुल्येन कुर्वन्ति | पर्यावरणप्रदूषकं धूमं क्षिपतां वाहनानाम् औद्योगिक - यन्त्रागाराणां सङ्ख्या निरन्तरं वर्धमाना अस्ति | यद्यपि विकासाय नवीनाः आविष्काराः अपेक्षिताः परं सञ्चाराय विस्तृताः सुरक्षिताः मार्गाः जनानां कृते अपि आवश्यकाः एव | यदि पर्यावरणं प्राणिजीवनाय अनुकूलं न भविष्यति तर्हि पृथिव्यां जीवनमेव असंभवं भविष्यति तदा भौतिकविकासेन किम् ! अतः सर्वकारः जनसहयोगेन सर्वथा पर्यावरणरक्षणाय यत्नशीलः भवेदिति |

( अ ) एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

(i) के रोपणीयाः रक्षणीयाः च ?

(ii) कदा पर्यावरणस्य प्रदूषणस्य समस्या नासीत् ?

(iii) अस्माकं देशः कस्य पोषकः ?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2 x 2 = 4

(i) किं जानन्तः जनाः प्लास्टिक् - निर्मितवसूनां प्रयोगं बाहुल्येन कुर्वन्ति ?

(ii) यदि पर्यावरणं प्राणिजीवनाय अनुकूलं न भविष्यति तर्हि किं भविष्यति ?

(iii) केषां सङ्ख्या निरन्तरं वर्धमाना अस्ति ?

(स) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1

(द) यथानिर्देशम् उत्तरत । (केवलं प्रश्नत्रयम्) 1 x 3 = 3

(i) ' जनाः अस्याः गाम्भीर्यं न अनुभवन्ति ' अत्र किं क्रियापदम् ?

(अ) जनाः (ब) अत्र (स) अस्याः (द) अनुभवन्ति

(ii) 'नवीनाः' इति विशेषणपदस्य विशेष्यपदं किम् ?

(अ) जनाः (ब) आविष्काराः (स) अपेक्षिताः (द) मार्गाः

(iii) 'शोषकः' इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?

(अ) विषयः (ब) चिन्तनीयः (स) सरलः (द) पोषकः

(iv) 'वयं प्रतिदिनं तेषां कर्तनं पश्यामः|' अस्मिन् वाक्ये 'पश्यामः' क्रियायाः कर्तृपदं किं प्रयुक्तम् ?

(अ) वयम् (ब) तेषां (स) प्रतिदिनं (द) कर्तनम्

खण्ड: "ख" (SECTION B) रचनात्मक - कार्यम् 15 अङ्काः

2. भवती प्रभा अस्ति । स्वमातरं प्रति स्वस्वास्थ्यविषये लिखितम् इदं पत्रं मञ्जूषायाः सहायतया पुनः सम्पूर्णं लिखतु । ½ x 10 = 5

विद्यालयपरिसरः

(i) ................

दिनाङ्कः : 11 / 03 / 2023

समादरणीयाः ! (ii) .............. !

सादरं प्रणामाः ।

अत्र कुशलं तत्रास्तु । सम्प्रति मम (iii) ............ परीक्षा सञ्चरति । अत्र छात्रावासे पठनस्य वातावरणं तु शोभनं वर्तते | अत्र अध्यापकाः अपि च अतीव कर्मठाः सन्ति । अतः पठनस्य कार्यं (iv) .......... एव भवति , परन्तु अध्ययनकारणात् शयनस्य भोजनस्य च (v) .......... एव न प्राप्यते । अतः अद्यत्वे मम (vi) ............. सुष्ठु नास्ति । अहं (vii) ............... पीडिता अस्मि । परं काचिद् अपि (viii) ........... नैव करणीया । आशासे अहं शीघ्रमेव पूर्णतया स्वस्था भविष्यामि । परीक्षायाः अनन्तरं (ix) ............. आगमिष्यामि । तदा वयं मिलित्वा भ्रमणाय वाराणसीनगरं गमिष्यामः । पित्रे (x) ............ ।

भवत्याः पुत्री

प्रभा

| वार्षिकी , शिमलातः , ज्वरेण , मातृचरणाः !, गृहम् , |
|---|

| स्वास्थ्यम् , समुचितम् , नमः , समयः , चिन्ता । |
|---|

मञ्जूषा :-

3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत - 1 x 5 = 5



मञ्जूषा :-

| उद्यानम् , धावतः , जनौ , वातावरणम् , नगरस्य , महिलाः , वृक्षाः , साधारणम् , विशालभवनानि , बसस्थानम् , स्वच्छम् , प्रतीक्षाम् , तिष्ठन्ति , अवकरपात्रम् । |
|---|

अथवा ( OR )

मञ्जूषाप्रदत्तपदानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य न्यूनातिन्यूनं पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत ।

" वृक्षाः अस्माकं मित्राणि "

मञ्जूषा :-

| वृक्षाः , सत्पुरुषाः , परोपकारम् , छाया , फलानि , पुष्पाणि , जनाः , पवनः , काष्ठम् , शीतलः , स्वास्थ्याय , आवश्यकम् , पथिकः , आनन्दम् , अनुभवन्ति , भूमेः , संरक्षणम् , वर्षा , पक्षिभ्यः , वासः । |
|---|

4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत - ( केवलं वाक्यपञ्चकम् ) 1 x 5 = 5

( i ) कल तुम कहां गए थे ? — Where did you go yesterday ?

( ii ) घर के बाहर मत खेलो । — Do not play outside the home.

( iii ) भारत ऋषियों की भूमि है । — Bharat is the land of saints.

( iv ) हमारा जीवन अनुशासित होना है । — Our life should be disciplined.

( v ) मैं अपने जन्मदिन पर देवालय जाऊंगा । — I will go to temple on my birthday.

( vi ) हम बाग में खेलते हैं । — We play in the garden.

( vii ) बालक मित्रों के साथ खेलता है । — The child studies with friends.

## खण्डः " ग " ( SECTION C ) अनुप्रयुक्तव्याकरणम् 25 अङ्काः

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिच्छेदं वा कुरुत - ( केवलं प्रश्नचतुष्टयम् ) 1 x 4= 4

( i ) क्रुद्धः सिंहः <u>इतस्ततः</u> धावति ।

( ii ) <u>प्रकृतिः + एव</u> शरणम् ।

( iii ) उदीरितः + अर्थः पशुनापि गृह्यते ।

( iv ) अचिरादेव चण्डवातेन सह प्रवर्षः समजायत ।

( v ) माम् नय अस्मात् + नगरात् बहुदूरम् ।

6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत -

( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

( i ) सः भारवेदनया क्रन्दति स्म ।

( a ) भारम् वेदनया ( b ) भारस्य वेदनया

( c ) भारेण वेदनया ( d ) भाराय वेदनया

( ii ) प्रस्तरतले लतातरुगुल्माः मे भवन्तु पिष्टाः ।

( a ) लता च तरुः च ( b ) लता च तरवः च

( c ) लताः च गुल्माः च ( d ) लताः च तरवः च गुल्माः च

( iii ) रामस्य समीपम् उपसृत्य प्रणम्य च ।

( a ) उपरामम् ( b ) उपरामेण

( c ) उपरामः ( d ) उपरामस्य

( iv ) को भेदः पिकः च काकः च तयोः ।

( a ) पिककाकम् ( b ) पिककाकयोः

( c ) पिककाकस्य ( d ) पिककाकाः

( v ) विमूढधीः मधुरं न वदति ।

( a ) विमूढा धीः ( b ) विमूढः धीः

( c ) विमूढाः धियः ( d ) विमूढा धीः यस्य सः

7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति - प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत - ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

( i ) भगवान् वाल्मीकिः वधूः इति ।

( a ) भग + वन् ( b ) भग + मतुप्

( c ) भग + वतुप् ( d ) भग + क्तवतु

( ii ) सर्वेषामेव मत्कृते महत् + त्व विद्यते ।

( a ) महत्ता ( b ) महत्त्वम्

( c ) महत्त्वः ( d ) महत्वम्

( iii ) किं नामधेया युवयोर्जननी ।

( a ) नामधेय + तल् ( b ) नामधेय + त्व

( c ) नामधेय + कत्वा ( d ) नामधेय + टाप्

( iv ) देशस्य सेवा सर्वेषां नीति + ठक् कर्तव्यम् भवेत् ।

( a ) नैतिकम् ( b ) नैतिकी

( c ) नैतिकः ( d ) नैतिक

( v ) नृत्यातिरिक्तं का तव विशेषता ?

(a) विशेष + टाप्  (b) विशेष + क्त
(c) विशेष + तल्  (d) विशेष + क्तवतु

8. वाच्यानुसारं उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत -
( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

(i) मोहनः - रमे ! किं तत्र शालायां गायकः गीतानि गायति ?
रमा - आम् , तत्र गायकेन गीतानि .................... ।
(a) गायति (b) गायन्ति (c) गीयन्ते (d) गीयते

(ii) मोहनः - किं कापि बाला तत्र नृत्यति ?
रमा - आम् , तत्र तु द्वे बाले ........................... ।
(a) नृत्यति (b) नृत्यतः (c) नर्तिष्यतः (d) नृत्यन्ति

(iii) मोहनः - किम् इदानीं त्वम् अपि तत्र गच्छसि ?
रमा - आम् , ............. अपि तत्र गम्यते ।
(a) अहम् (b) वयम् (c) मया (d) त्वया

(iv) मोहनः - अरे गुरुः आगच्छति । अहं तु ............... प्रणमामि ।
(a) गुरुम् (b) गुरुः (c) गुरवे (d) गुरोः

9. कालबोधकशब्दैः अधोलिखित - दिनचर्यां पूरयत - ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

(i) अहं नित्यं रात्रौ (8 : 30) भोजनं करोमि ।
(ii) तदनन्तरं (8 : 45) भ्रमणाय गच्छामि ।
(iii) तदा (9 : 30 ) मनोरञ्जनाय दूरदर्शनं पश्यामि ।
(iv) दूरदर्शनं दृष्ट्वा (10 : 00) पठनं करोमि ।
(v) रात्रौ (11 : 15) अहं स्वपिमि ।

10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत -
( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

(i) ते सभायां ............. मा वदेयुः ।
(ii) यदि त्वं मां मुक्त्वा यासि .................... वेलाप्यवेला स्यात् ।
(iii) यूयम् ................. प्रयासं कुरुत ।
(iv) मार्गेषु ................ अवकरं न क्षिपेयुः ।

मञ्जूषा :- | तदा , इतस्ततः , वृथा , अपि । |

11. अधोलिखितवाक्येषु रेखाङ्कित - अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत -
( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

(i) <u>पवनं</u> वेगेन वहति ।
(a) पवन (b) पावनम् (c) पवनः (d) पवनेन

(ii) अहं आम्रं <u>खादति</u> ।
(a) खादामि (b) खादतः (c) खादसि (d) खादामः

(iii) <u>मोहनः</u> गृहं तत्रास्ति ।

केन्द्रीय विद्यालय संगठन

(a) मोहनम् (b) मोहनात् (c) मोहने (d) मोहनस्य

(iv) भवान् श्वः कुत्र <u>गच्छति</u> ?

(a) गमिष्यति (b) अगच्छत् (c) गच्छतु (d) आगमिष्यति

## खण्ड: "घ" (SECTION D) पठित - अवबोधनम् 30 अङ्का:

12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान् । तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः । तत्तनयः तत्रैव छात्रावासे निवसन् अध्ययने संलग्नः समभूत् । एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः। परमर्थकार्श्येन पीडितः स बसयनं विहाय पदातिरेव प्राचलत् । पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत्। "निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभवहा", इति विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपागतः । करुणापरो गृही तस्मै आश्रयं प्रायच्छत् ।

(i) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्) ½ x 2 = 1

(क) कीदृशः जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान् ?

(ख) तनयः कुत्र निवसन् अध्ययने संलग्नः समभूत् ?

(ग) करुणापरो गृही कस्मै आश्रयं प्रायच्छत् ?

(ii) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) स पिता किमर्थं व्याकुलः जातः ?

(ख) सः किं विचार्य पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपागतः ?

(ग) अर्जितेन वित्तेन सः जनः किम् अकरोत् ?

(iii) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) "परमर्थकार्श्येन पीडितः स बसयनं विहाय पदातिरेव प्राचलत्" अत्र वाक्ये कर्तृपदं किम्?

(ख) "करुणापर:" इति विशेषणपदस्य विषेष्यपदं किम् ?

(ग) "पुत्रस्य" इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम ?

13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5

वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम् ।
कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम् ॥
करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम् । शुचि ... ॥

(i) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्) ½ x 2 = 1

(क) जलं कीदृशं न अस्ति ?

(ख) समलं किम् अभवत् ?

(ग) भृशं दूषितं किम् अस्ति ?

(ii) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) मनुष्यैः किं करणीयम् ?

(ख) भक्ष्यं कीदृशं जातम् ?

(ग) शुद्धीकरणं कुत्र करणीयम् ?

( iii ) भाषिककार्यम् - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " बहु " इति पदस्य पर्यायपदं किमस्ति ?

( ख ) " अन्तर् " इति पदस्य विपर्ययपदं किम् ?

( ग ) " जलम् " इति पदस्य विशेषणपदं किम् ?

14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5

( एतस्मिन्नेव काले व्याघ्रचित्रकौ अपि नदीजलं पातुमागतौ एतं विवादं श्रुणुत: वदत: च )

व्याघ्रचित्रकौ :- अरे किं वनराजपदाय सुपात्रं चीयते ? एतदर्थं तु आवामेव योग्यौ । यस्य कस्यापि चयनं कुर्वन्तु सर्वसम्मत्या ।

सिंह: :- तूष्णीं भव भो: । युवामपि मत्सदृशौ भक्षकौ न तु रक्षकौ । एते वन्यजीवा: भक्षकं रक्षकपदयोग्यं न मन्यन्ते अत एव विचारविमर्श: प्रचलति ।

बक: :- सर्वथा सम्यगुक्तं सिंहमहोदयेन । वस्तुत: एव सिंहेन बहुकालपर्यन्तं शासनं कृतं परमधुना तु कोऽपि पक्षी एव राजेति निश्चेतव्यम् अत्र तु संशीतिलेशस्यापि अवकाश: एव नास्ति ।

सर्वे पक्षिण: :- आम् आम् , कश्चित् खग: एव वनराज: भविष्यति इति ।

( i ) एकपदेन उत्तरत। ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) कौ नदीजलं पातुमागतौ ?

( ख ) ' तूष्णीं भव ' इति कः कथयति ?

( ग ) किमर्थं सुपात्रं चीयते ?

( ii ) पूर्णवाक्येन उत्तरत। ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) तत्र किमर्थं विचारविमर्शः प्रचलति ?

( ख ) अधुना किं निश्चेतव्यम् ?

( ग ) सर्वे पक्षिणः किं कथयन्ति ?

( iii ) भाषिककार्यम् - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " एतस्मिन्नेव काले व्याघ्रचित्रकौ अपि नदीजलं पातुमागतौ " वाक्ये किं कर्तृपदं प्रयुक्तम् ?

( ख ) " पक्षिणः " इति विशेष्यपदस्य विशेषणपदं किम् ?

( ग ) " कलहम् " इति पदस्य किं पर्यायपदं नाट्यांशे प्रयुक्तम् ?

15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

( i ) आत्मकल्याणम् इच्छन् नरः कदापि <u>परेषाम्</u> अहितं कर्म न कुर्यात् ।

( ii ) अयम् <u>अन्येभ्यो</u> दुर्बलः ।

( iii ) पुरा त्वया <u>मह्यं</u> व्याघ्रत्रयं दत्तम् ।

( iv ) <u>चातकः</u> वने वसति ।

( v ) तपोवनवासिनः जननीं <u>देवीनाम्ना</u> आह्वयन्ति ।

16. मञ्जूषायाः सहायतया अधोलिखितश्लोकस्य अन्वयं पूरयत - 1 x 4 = 4

मृगा मृगै: सङ्गमनुव्रजन्ति ,
गावश्च गोभि: तुरगास्तुरङ्गै: ।

मूर्खाश्च मूर्खैः सुधियः सुधीभिः ,
समान - शील - व्यसनेषु सख्यम् ॥

अन्वयः :- मृगाः ( i ) ............. गावश्च गोभिः ( ii ) ............. तुरङ्गैः , मूर्खाः मूर्खैः , सुधियः सुधीभिः सङ्गम् ( iii ) ...............। ( vi ) ........... समान - शील - व्यसनेषु ( भवति ) ।

मञ्जूषा :- | सख्यम् , मृगैः , तुरगाः , अनुव्रजन्ति । |

अथवा ( OR )

अधोलिखित - श्लोकस्य भावार्थं मञ्जूषातः उचितपदानि चित्वा पूरयत - 1 x 4 = 4

आचारः प्रथमो धर्मः इत्येतद् विदुषां वचः ।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषतः ॥

भावार्थः :- अस्य भावोऽस्ति यत् सदाचारः जनानां ( i ) .................... धर्मः अस्ति , इति ( ii ) .................. कथयन्ति अत एव जनैः ( iii ) ................. रक्षा प्राणेभ्यः अपि ( iv ) .................... करणीया ।

मञ्जूषा :- | विद्वांसः , विशेषतया , प्रथमः , सदाचारस्य । |

17. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं संयोज्य पुनः लिखत - ½ x 8 = 4

( i ) व्याघ्रः तां व्याघ्रमारीं मत्वा अधावत् ।
( ii ) तस्य भार्या बुद्धिमती आसीत् ।
( iii ) मार्गे सा एकं व्याघ्रं ददर्श ।
( iv ) बुद्धिमती व्याघ्रजाद् भयात् मुक्ताऽभवत् ।
( v ) तत्र राजसिंहः नाम राजपुत्रः वसति स्म ।
( vi ) अस्ति देउलाख्यो नाम ग्रामः ।
( vii ) सा पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता ।
( viii ) सा वाक्चातुर्येण बुद्धेः प्रयोगेन च व्याघ्रं भयभीतं कृतवती ।

18. अधोलिखितवाक्येषु रेखाङ्किपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत - ( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

( i ) एकः दुर्बलः <u>बलीवर्दः</u> भूमौ पपात ।
( a ) गौः ( b ) धेनुः ( c ) वृषभः ( d ) महिषः
( ii ) तदा तत्र <u>सुराधिपः</u> आगच्छत् ।
( a ) नृपः ( b ) कृषकः ( c ) धेनुः ( d ) इन्द्रः
( iii ) नराणां प्रथमः <u>शत्रुः</u> आलस्यम् अस्ति ।
( a ) मानवः ( b ) मित्रम् ( c ) रिपुः ( d ) सहायकः
( iv ) फलच्छायासमन्वितः <u>वृक्षः</u> सेवितव्यः ।

( a ) तरुः ( b ) खगः ( c ) छाया ( d ) मानवः

**************************************************************************************************

उत्तराणि / KEY. CBSE - 10 Class (122) SANSKRIT QUESTION PAPER - 2022 - 23. Marks : 80

**************************************************************************************************

"क" खण्डः ( SECTION A ) अपठित - अवबोधनम् 10 अङ्काः :

1. ( अ ) वृक्षाः , वैदिककाले , प्राकृतिक - पर्यावरणस्य | 1 x 2 = 2

( आ ) "प्लास्टिक्" इति रसायनेन निर्मितवस्तूनि पर्यावरणाय हानिकराणि इति ...... |
..... पृथिव्यां जीवनमेव असम्भवं भविष्यति तदा भौतिकविकासेन किम् ! ...... |
पर्यावरणदूषकं धूमं क्षिपतां वाहनानाम् औद्योगिक - यन्त्रागाराणां ...... | 2 x 2 = 4

( इ ) पर्यावरणम् / पर्यावरण - प्रदूषणम् / ....... / अन्यत् यत्किमपि यथोचितम् 1

( ई ) ( द , ब , द , अ ) अनुभवन्ति , आविष्काराः , X पोषकः , वयम् | 1 x 3 = 3

"ख" खण्डः ( SECTION B ) रचनात्मकम् कार्यम् 15 अङ्काः

2. शिमलातः , मातृचरणाः ! , वार्षिकी , समुचितम् , समयः , स्वास्थ्यं , ज्वरेण , चिन्ता , गृहं , नमः । ½ x10 = 5

3. चित्रस्य वर्णनं शुद्ध - कर्तृ - क्रिया - पादानाम् आधारेण पूर्ण - अङ्काः देयाः | यथा :-

1. इदं नगरस्य चित्रम् अस्ति | 2. अस्मिन् चित्रे उद्यानम् अस्ति |
3. अस्मिन् चित्रे विशालभवनानि सन्ति | 4. अस्मिन् चित्रे बसस्थानम् अस्ति |
5. जनः बसयानस्य प्रतीक्षां कुर्वन्ति | 6. इदं चित्रं सुन्दरम् अस्ति | 1 x 5 = 5

4. अनुवादः

1. ह्यः यूयं कुत्र अगच्छत \ गताः \ गतवन्तः | 2. गृहात् बहिः मा क्रीड / क्रीडत |
3. भारतः ऋषीणां भूमिः अस्ति | 4. अस्माकं जीवितम् अनुशासितं भवेत् |
5. अहं मम जन्मदिने देवालयं गमिष्यामि | 6. वयम् उद्याने क्रीडामः |
7. बालकः मित्रैः सह पठति | 1 x 5 = 5

"ग" खण्डः ( SECTION C ) अनुप्रयुक्तव्याकरणम् 25 अङ्काः

5. ( i ) इतः + ततः ( ii ) प्रकृतिरेव ( iii ) उदीरितोऽर्थः
( iv ) अचिरात् + एव ( v ) अस्मान्नगरात् । 1 x 4 = 4

6. ( b , d , a , b , d ) ( i ) भारस्य वेदनया ( ii ) लताः च तरवः च गुल्माः च
( iii ) उपरामम् ( iv ) पिककाकयोः ( v ) विमूढा धीः यस्य सः । 1 x 4 = 4

7. ( b , b , d , a , c ) ( i ) भाग + मतुप् ( ii ) महत्त्वम्
( iii ) नामधेय + टाप् ( iv ) नैतिकम् ( v ) विशेष + तल् । 1 x 4 = 4

8. ( c , d , c , a ) ( i ) गीयन्ते ( ii ) नृत्यतः
( iii ) मया ( iv ) गुरुम् । 1 x 3 = 3

9. ( i ) सार्ध - अष्ट - वादने ( ii ) पादोन नव - वादने ( iii ) सार्ध - नव - वादने
( iv ) दश - वादने ( v ) सपाद - एकादश - वादने । 1 x 4 = 4

10. ( i ) वृथा ( ii ) तदा ( iii ) अपि ( iv ) इतस्ततः । 1 x 3 = 3

11. ( c , a , d , a ) ( i ) पवनः ( ii ) खादामि ( iii ) मोहनस्य ( iv ) गमिष्यति । 1 x 3 = 3

“ घ ” खण्डः ( SECTION D ) पठित - अवबोधनम् 30 अङ्काः

12. ( i ) निर्धनो , छात्रावासे , तस्मै / जनाय । ½ x 2 = 1
( ii ) .... तनूजस्य रुग्णतामाकर्ण्य .... ।
सः “ निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा ” इति .... ।
..... स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः । 1 x 2 = 2
( iii ) सः ( कर्तृ ) , गृही ( विषेष्यपदं ) , = तनूजस्य । 1 x 2 = 2

13. ( i ) निर्मलं , धरातलम , वायुमण्डलं । ½ x 2 = 1
( ii ) .... शुद्धीकरणं .... । .... कुत्सितवस्तुमिश्रितं .... । .... बहिरन्तर्जगति .... । 1 x 2 = 2
( iii ) = भृशं , x बहिः , निर्मलं । 1 x 2 = 2

14. ( i ) व्याघ्रचित्रकौ , सिंहः , वनराजपदाय । ½ x 2 = 1
( ii ) .... एते वन्यजीवाः भक्षकं रक्षकपदयोग्यं न मन्यन्ते अत एव .... ।
.... तु कोऽपि पक्षी एव राजेति .... ।
.... आम् आम् , कश्चित् खगः एव वनराजः भविष्यति इति । 1 x 2 = 2
( iii ) व्याघ्रचित्रकौ ( कर्तृ ) , सर्वे ( विशेषण ) , = विवादं । 1 x 2 = 2

15. केषां , केभ्यः , कस्मै / कस्यै , कः , केन / किं नाम्ना / कथं । 1 x 4 = 4

16. अन्वयः :- मृगैः , तुरगाः , अनुव्रजन्ति ( अन्वये मञ्जूषायां च पदं नास्ति ) , सख्यं । अथवा / OR
भावार्थः :- प्रथमः , विद्वांसः , सदाचारस्य , विशेषतया । 1 x 4 = 4

17. 1. ( vi ) अस्ति देउलाख्यो नाम ग्रामः ।
2. ( v ) तत्र राजसिंहः नाम राजपुत्रः वसति स्म ।
3. ( ii ) तस्य भार्या बुद्धिमती आसीत् ।
4. ( vii ) सा पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता ।
5. ( iii ) मार्गे सा एकं व्याघ्रं ददर्श ।
6. ( viii ) सा वाक्चातुर्येण बुद्धेः प्रयोगेन च व्याघ्रं भयभीतं कृतवती ।
7. ( i ) व्याघ्रः तां व्याघ्रमारीं मत्वा अधावत् ।
8. ( iv ) बुद्धिमती व्याघ्रजाद् भयात् मुक्ताऽभवत् । ½ x 8 = 4

18. ( c , d , c , a ) ( i ) = वृषभः ( ii ) = इन्द्रः ( iii ) = रिपुः ( iv ) = तरुः । 1 x 3 = 3

**********************************************************************************************

Q.NO. 1. " क " - खण्डः अपठित - अवबोधनम् - 10 अङ्काः

सूचना :- Q.NO. 1 , Similar Questions and marks.

Q.NO. 1. I & II - एकपदेन & पूर्णवाक्येन उत्तरत 6 Marks
Q.NO.12. I & II - एकपदेन & पूर्णवाक्येन उत्तरत 3 Marks
Q.NO.13. I & II - एकपदेन & पूर्णवाक्येन उत्तरत 3 Marks
Q.NO.14. I & II - एकपदेन & पूर्णवाक्येन उत्तरत 3 Marks &
Q.NO.15. - प्रश्ननिर्माणम् 4 Marks .
Total = 19 Marks.

Based on Q.NO.15. प्रश्नवाचकपदानि |

If you learn प्रश्नवाचकपदानि / basics you can get 19 Marks with confidence.
Just follow the clues in every Question :- like प्रश्नवाचकपद - लिङ्ग , विभक्ति & वचन given in the question. with these clues You can write / choose the correct answer from given paragraph only.

See the Q.NO.15. Pg No. 106 for प्रश्नवाचकपदानि based on which you can write correct answers from the अपठित - गद्यांश as well पठित - गद्यांश |

*********************************************************************************************

अभ्यासाय एकः गद्यांशः , तदाधारितप्रश्नाः , उत्तराणि , प्रश्नवाचकपदानुसारं उत्तराणां विवरणं च |

Q.NO.1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 10 अङ्काः

प्रातः कालः अतीव मधुरः कालः भवति । यदा स्वच्छे आकाशे सूर्यः उदेति तदा अन्धकारः दूरं गच्छति। सर्वत्र प्रकाशः भवति । पक्षिणः इतस्ततः भ्रमन्ति । ते मधुरस्वरेण मधुरं गीतं गायन्ति । सरोवरेषु कमलानि उद्यानेषु च विभिन्ननि पुष्पाणि विकसन्ति । तेषु भ्रमराः सानन्दं गुञ्जन्ति । शीतलः वायुः वहति । सम्पूर्णं वातावरणं सुगन्धमयं भवति । भ्रमणशीलाः प्रसन्नाः जनाः उद्यानेषु भ्रमन्ति । केचन तत्रैव व्यायामं कुर्वन्ति । अनेके बालाः अपि उद्यानेषु यत्र तत्र धावन्ति क्रीडन्ति च । ते अतीव प्रसन्नाः भवन्ति । न केवलं मानवाः , पशवः अपि प्रसन्नाः भवन्ति । वानराः वृक्षेषु कूर्दन्ति । सर्वे जनाः स्वकार्येषु संलग्नाः भवन्ति । एषा सुखदायिनी प्रभातवेला जनान् कर्तव्यस्य पाठं पाठयति । धन्या एषा प्रभातवेला ।

सूचना :- उपरि प्रदत्त - अपठित - अनुच्छेदं ध्यानेन पठन्तु | पठनसमये प्रत्येकस्मिन् वाक्ये कर्तृ - क्रिया - ज्ञानं , विशेषण - विशेष्यपद - ज्ञानं / पदज्ञानं भवतु |

( अ ) एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 X 2 = 2

( i ) प्रातःकलः कीदृशः कालः भवति ?

( ii ) यदा सूर्यः उदेति तदा कः दूरं गच्छति ?

( iii ) किं सुगन्धमयं भवति ?

सूचना :- शुद्ध - उत्तरलेखनाय प्रश्नवाचकपदं सहायकपदं भवति | प्रश्ने अन्यपदानि अपि शुद्ध - उत्तरलेखनाय

सहाकपदानि भवन्ति | तालिकाधारेण पश्यामः :-

| प्रश्न संख्या | प्रश्नः ( एकपदेन उत्तरत - ) | प्रश्नवाचकपदम् | अनुच्छेदे प्रश्नस्य अन्यपदानां वाक्यम् \| | प्रश्नवाचकपदानुसारं उत्तर - लेखनम् |
|---|---|---|---|---|
| ( i ) | प्रातःकलः कीदृशः कालः भवति ? | कीदृशः | प्रातः कालः अतीव मधुरः कालः भवति। | अतीव मधुरः |
| ( ii ) | यदा सूर्यः उदेति तदा कः दूरं गच्छति ? | कः | सूर्यः उदेति तदा अन्धकारः दूरं गच्छति। | अन्धकारः |
| ( iii ) | किं सुगन्धमयं भवति ? | किं | सम्पूर्णं वातावरणं सुगन्धमयं भवति । | सम्पूर्णं वातावरणं |

( आ ) पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 2 X 2 = 4

( i ) सरोवरेषु कानि विकसन्ति उद्यानेषु कानि विकसन्ति ?

( ii ) के स्वकार्येषु संलग्नाः भवन्ति ?

( iii ) प्रभातवेला जनान् किं पाठयति ?

सूचना :- शुद्ध - उत्तरलेखनाय प्रश्नवाचकपदं सहायकपदं भवति | प्रश्ने अन्यपदानि अपि शुद्ध - उत्तरलेखनाय सहाकपदानि भवन्ति | तालिकाधारेण पश्यामः :-

| प्रश्नसंख्या | प्रश्नः ( पूर्णवाक्येन उत्तरत - ) | प्रश्नवाचकपदम् | अनुच्छेदे प्रश्नस्य अन्यपदानां वाक्यम् \| प्रश्नवाचकपदानुसारं उत्तर - लेखनम् |
|---|---|---|---|
| ( i ) | सरोवरेषु कानि विकसन्ति उद्यानेषु च कानि विकसन्ति ? | कानि कानि | सरोवरेषु कमलानि उद्यानेषु च विभिन्ननि पुष्पाणि विकसन्ति । |
| ( ii ) | के स्वकार्येषु संलग्नाः भवन्ति ? | के | सर्वे जनाः स्वकार्येषु संलग्नाः भवन्ति । |
| ( iii ) | प्रभातवेला जनान् किं पाठयति ? | किं | एषा सुखदायिनी प्रभातवेला जनान् कर्तव्यस्य पाठं पाठयति । |

( इ ) अस्य अनुच्छेदस्य उचितं शीर्षकं लिखत - 1 अङ्कः

सूचना :-

| | | | |
|---|---|---|---|
| " शीर्षकम् ":- " कालः " / " प्रभातवेला " | " .......... " \| एकं पदम् \| | प्रथमाविभक्ति - पदं अनुच्छेदात् चित्वा लिखत \| | अथवा / OR |
| " शीर्षकम् " :- " मधुरः कालः " / " सुखदायिनी प्रभातवेला " \| | " .... .... " \| पदद्वयम् \| | विशेषण - विशेष्य - पदे अनुच्छेदात् चित्वा लिखत \| | अथवा / OR |
| " शीर्षकम् " :- " प्रकृतेः सौन्दर्यम् " / " कालस्य महत्त्वम् " \| | " .... .... " \| पदद्वयम् \| | षष्ठी + प्रथमाविभक्तिपदम् \| अनुच्छेदात् चित्वा लिखत \| | अथवा / OR |
| " शीर्षकम् " :- " यत्किमपि " पदं / पदद्वयम् " | " ...... " / " ....... ....... " | अनुच्छेदात् चित्वा लिखत \| | |

( ई ) यथा निर्देशम् उत्तरत - ( केवलं प्रश्नत्रयम् MCQs ) 1 X 3 = 3

( i ) ' ते मधुरस्वरेण मधुरं गीतं गायन्ति ' इत्यस्मिन् वाक्ये क्रियापदं किम् अस्ति ?

ते / गीतं / गायन्ति / मधुरं

( ii ) ' गीतम् ' इति पदस्य विशेषणपदं किं प्रयुक्तम् ?

मधुरः / मधुरं / प्रातः / दूरं

( iii ) ‘ गुञ्जन्ति ’ इति क्रियापदस्य कर्तृपदं किम् अस्ति ?

भ्रमराः / वानराः / पक्षिणः / मानवाः

( iv ) ‘ गगने ’ इति अर्थे किं पर्यायपदं प्रयुक्तम् ?

प्रातः / आकाशे / उद्यानेषु / ते

************************************************************************************************************

सूचना :- अस्मिन् प्रश्ने CBSE द्वारा निर्धारित - भाषिक - कार्याय तत्त्वानि जानीमः ।

( चयनम् = Choose / pick up the correct word from given sentence )

भाषिक - कार्यम् :-

* कर्तृपदम् / क्रियापदम् किम् ? :- रामः गच्छति । कर्तृपदम् - रामः / क्रियापदम् - गच्छति ।

* विशेषणपदं / विशेष्यपदं किम् ? :- सुन्दरं वनम् । विशेषणपदम् - सुन्दरम् / विशेष्यपदम् - वनम् ।

* समानार्थकपदम् किम् ? :- सन्तोषः = आनन्दः ,

* विलोमपदम् किम् ? :- सुखम् x दुःखम् ।

भाषिक - प्रश्नानाम् उत्तरलेखनाय प्रदत्ते प्रश्ने एव सहायकपदं भवति , तदाधारेण उत्तरं लिङ्ग - विभक्ति - वचनानुसारं प्रदत्तविकल्पेभ्यः / वाक्यात् चित्वा लेखनीयम् ।

“ प्रश्नपत्रे सर्वत्र सहायकपदानुसारम् एव उत्तरं लेखनीयं भवति ” ।

************************************************************************************************************

अभ्यासाय :- गद्यांशः - 1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 10 अङ्काः

संस्कृतभाषायाम् आदर्शपुरुषरूपेण , मर्यादापुरुषरूपेण वा भगवतः श्रीरामस्य वर्णनं महर्षिणा वाल्मीकिना स्वमहाकाव्ये रामायणे अनर्घैः अक्षरैः चित्रितम् । नाटकेषु मुख्यतः महाकविः भासः प्रतिमानाटके अभिषेकनाटके च कृतवान् । ततो महाकविः भवभूतिः उत्तररामचरिते महावीरचरिते च मर्यादापुरुषोत्तमम् अवर्णयत् । महाकविः कालिदासः रघुवंशे महाकाव्ये वर्णितवान् । ये ये महाकवयः नाटककाराः अस्य वर्णनं कुर्वन्ति ते सर्वे अस्य अलौकिकं चरित्रम् वर्णयन्ति । न केवलं वयं भारतीया एव अपितु सर्वेऽपि सांसारिकाः जनाः पूजयन्ति पुरुषमेनम् । अस्य चरितस्य कारणात् अस्माकं देशे विजयादशमी दीपावली च भक्त्या श्रद्धया अत्युत्साहेन च आयोज्येते ।

अ ) एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

i. वाल्मीकिः आदर्शपुरुषं कस्मिन् अवर्णयत् ?

ii. उत्तररामचरितं कस्य कृतिः अस्ति ?

iii. प्रतिमानाटकम् केन लिखितम् ?

ब ) पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 2 x 2 = 4

i ) अस्माकं देशे पर्वद्वयं कथं आयोज्यते ?

ii ) के रामस्य चरित्रम् अलौकिकं वर्णयन्ति ?

iii ) महाकविकालिदासस्य महाकाव्यस्य नाम किम् ?

स ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत - 1

द ) यथानिर्देशम् उत्तररत - ( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

i. अत्र अनुच्छेदे ‘ अक्षरैः ’ इति पदस्य किं विशेषणं प्रदत्तम् ?

( क ) अनर्घैः ( ख ) सुन्दरैः ( ग ) उत्तमैः ( घ ) विचक्षणैः

ii. अनुच्छेदे 'अद्भुतम्' अस्य पदस्य किं पर्यायपदं प्रयुक्तम् ?

(क) महाकाव्यम् (ख) अलौकिकम् (ग) महान्तम् (घ) विशिष्टम्

iii. 'पूजयन्ति' इति क्रियापदस्य कर्तृपदं किं प्रयुक्तम् ?

(क) भासः (ख) कालिदासः (ग) जनाः (घ) अक्षराः

iv. 'लौकिकं' इति पदस्य विपर्ययपदं किं प्रयुक्तम् ?

(क) अद्भुतम् (ख) वर्णनम् (ग) लौकिकम् (घ) अनर्घैः

*****************************************************************************************************

अभ्यासाय :- गद्यांशः - 2. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 10 अङ्काः

गङ्गाम् उभयत: विविधैः वृक्षैः सुशोभिताः ग्रामाः आसन् । तत्र एकस्मात् ग्रामात् बहिः वृक्षस्य अध: एक जीर्णः कूपः आसीत् । तस्मिन् कूपे मण्डूकानाम् अधिपतिः गङ्गदत्तः परिजनैः सह निवसति स्म । सः गङ्गदत्तः परिश्रमं विनैव प्रभुत्वं प्राप्नोत् । अतः गर्वितः अभवत्। तस्य दुर्व्यवहारेण केचन प्रमुखाः मण्डूकाः, रुष्टाः जाताः। ते गङ्गदत्तम् अधिकारेण हीनं कृत्वा कूपात् बहिः कर्तुम् उद्यताः अभवन् । तद् ज्ञात्वा गङ्गदत्तः विषादम् अनुभवति स्म । 'शत्रूणां नाशः कथं भवेत्' इति एकान्ते चाटुकारैः सह मन्त्रणम् अकरोत् । एकः नष्टबुद्धिः नाम मण्डूकः नत्वा अकथयत् - 'नीतिं विना किमपि न सिद्ध्यति, शत्रुः शत्रुणा नाशयितव्यः' इति नीतिः । एतेषां शत्रूणां नाशाय सर्पः सहायकः भविष्यति । सः वृक्षस्य कोटरे निवसति एवं संघर्षं विनैव शत्रुनाशः भविष्यति ।

(अ) एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) 1 × 2 = 2

(i) जीर्णः कूपः कस्य अधः आसीत् ?

(ii) मण्डूकानाम् अधिपतिः कः आसीत् ?

(iii) सर्पः कुत्र निवसति स्म ?

(ब) पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 2 × 2 = 4

(i) ग्रामाः कुत्र आसन् ?

(ii) गंगदत्तः किमर्थं गर्वितः आसीत् ?

(iii) गंगदत्त चटुकारैः सह किमर्थ मन्त्रणम् अकरोत् ?

(स) अस्य अनुच्छेदस्य कृते कृते उयुक्तं शीर्षकं संस्कृतेन लिखत - 1

(द) यथानिर्देशम् उत्तरत - (केवलं प्रश्नत्रयम्) 1 × 3 = 3

(i) 'प्रसन्नाः' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(क) अप्रसन्नाः (ख) रुष्टाः (ग) जाताः (घ) प्रमुखाः

(ii) 'जीर्णः कूपः' इति अनयोः पदयोः किं विशेष्यपदम् ?

(क) जीर्णः (ख) एकः (ग) कूपः (घ) आसीत्

(iii) 'निवसति स्म' इति क्रियापदस्य किं कर्तृपदं प्रयुक्तम् ?

(क) परिजनैः (ख) गङ्गदत्तः (ग) सह (घ) मण्डूकः

(iv) 'स्वामी' इत्यस्य पदस्य किं पर्यायपदम् प्रयुक्तम् ?

( क ) अधिपतिः ( ख ) गङ्गदत्तः ( ग ) परिजनैः ( घ ) प्रभुत्वम्

****************************************************************************************************

Q.NO.2. ख - खण्डः रचनात्मकं कार्यम् - 15 अङ्काः

Q.NO.2. पत्रलेखनम् । मञ्जूषात: उचितं पदं चित्वा पत्रे रिक्तस्थानानि पूरयित्वा पत्रं पुनः लिखत - ½ x 10 = 5

पाठ्यबिन्दूनां विवरणम् :- पत्रपूरणार्थम् ध्यातव्या: विषया: / पत्रस्य स्वरूपम् :- पत्रे रिक्तस्थानपूर्ति: कथं करणीया ? मञ्जूषाधारितपदानां अवबोध एव प्रधान: भवति । पश्यत -

* मञ्जूषायां दत्तानां पदानां लिङ्ग - विभक्ति - वचन - पुरुष - अव्यय - प्रत्ययान्त - पदानां अवबोध: / विभाग: भवतु । अनन्तरं पत्रे प्रदत्त - रिक्तस्थानेषु उत्तर - लेखनाय अध: प्रदत्त - 16 सहायकविषयाणां ज्ञानेन मञ्जूषात: शुद्धम् उत्तरं चित्वा लिखत ।
* प्रत्येकस्मिन् वाक्ये रिक्तस्थानात् पूर्वम् / परं यत् पदं भवति तत् पदम् एव उत्तरस्य कृते सहायकपदं भवति । तेन सहायकपदाधारेण मञ्जूषात: लिङ्ग - विभक्ति - वचनानुसारम् शुद्धमुत्तरं चित्वा लिखत ।
* वाक्यानि कर्तृ - वाच्ये / कर्मवाच्ये भवन्ति । अत: तदनुसारम् एव मञ्जूषात: उत्तरपदस्य चयनम् / लेखनं भवतु ।

****************************************************************************************************

उदाहरणानि :- पश्याम: तावत् अध: 16 सहायकविषया: उत्तरलेखने कथम् उपकुर्वन्ति इति पश्यामः :-

| पत्रे रिक्तस्थानस्य विषय: | उत्तरम् ( मञ्जूषायां दत्तं पदम् ) |
|---|---|
| 1. क: पत्रम् लिखति ? / भवान् क: ? | रमेश: / सुरेश: ........ |
| 2. कुत: लिखति ? | हैदराबाद्त: / दिल्लीत: / काशीत: / चेन्नैत: ......... |
| 3. कं लिखति ? | पितरम् / मित्रम् / प्रधानाचार्यम् ...... |
| 4. कथम् सम्बोधयति ? | आदरणीया : पितृपादा: / प्रिय मित्र रमेश ! / सुरेश ! |
| 5. कथम् नमस्कारम् करोति ? | सादरम् प्रणामा: / सप्रेम नम: / नमो नम: ....... |
| 6. कथं प्रारम्भ: क्रियते ? | अत्र कुशलम् । तत्रास्तु । तव पत्रम् प्राप्तम् । अहं नवमी / दशमी - कक्षाया: छात्र: अस्मि । अहं कुशली / अहं कुशलिनी / सर्वगतं कुशलम् । |
| 7. विषय - प्रस्तुतीकरणम् : - | ( * अध: वाक्येषु दत्तानि पदानि रिक्तस्थानानि इति चिन्तयन्तु । * मञ्जूषायां एतानि पदानि ( उत्तरपदानि ) भवन्ति । * मञ्जूषात: उचितम् उत्तरं चित्वा रिक्तस्थानपूर्तिं कुरुत । ) |

( वाक्ये रिक्तस्थानम् ( दत्तं पदं :- रिकस्थानम् इति चिन्तयन्तु | यथा :- कर्तृपदम् / क्रियापदम् ..... )

8. कर्तृपदम् .................. .................... ...................... ।
9. ............. ...................... ............................... क्रियापदम् ।
10. ............. कर्मपदम् ....................... ......................... ।
11. ............. विशेषण - पदम् ....................... .......................... ।
12. ............. ...................... विशेष्य - पदम् .......................... ।
13. अन्यपदानि :- विभक्तिपदानि , अव्ययपदानि , प्रत्ययान्त - पदानि ( गत्वा , आगत्य , ..... ) ।
14. समाप्ति: । प्रणामा: / मात्रे नम: / शुभं भूयात् । ........
15. क: लिखति । भवत: पुत्र: / पुत्री / भगिनी । भवत: शिष्य: / मित्रम् / सुहृद् ।
16. लेखकस्य नाम किम् ? रमेश: / सुरेश: / ..........

****************************************************************************************************

अभ्यासार्थम् एकं पत्रम् :-

Q.NO.2. भवतः नाम शिवः अस्ति। भवतः विद्यालये संस्कृत - नाटकस्य प्रदर्शनं भविष्यति। एतदर्थं स्वमित्रं रमेशं प्रति लिखितं निमन्त्रण - पत्रं मञ्जूषायां प्रदत्त - पदानां सहायतया पूरयित्वा लिखत - ½ x 10 = 5

नूतनविद्यापीठः

( i ) ...................

दिनाङ्क: ..............................

प्रिय मित्र रमेश !

सप्रेम नमः ,

नववर्षस्य ( ii ) ............. अत्र सर्वगतं कुशलम् । भवान् अपि कुशली इति मन्ये । अस्माकं विद्यालयस्य ( iii ) .................... नववववर्षस्य शुभावसरे भविष्यति । तत्र अस्माकं ( iv ) .................. “ शिशुलालनम् ” ( v ) इति ...................... प्रदर्शनं भविष्यति । अहं तस्मिन् नाटके रामस्य अभिनयं ( vi ) .................. । भवान् तद्दर्शनाय ( vii ) ......................... आगच्छतु । मम अपि ( viii ) .................... भविष्यति । सर्वेभ्यः अग्रजेभ्यः मम ( ix ) ............ निवेद्यताम् इति ।

भवतः मित्रम्

( x ) .......................

| | |
|---|---|
| मञ्जूषा | शिवः , शुभकामनाः , दिल्लीतः , प्रणामान् , वार्षिकोत्सवः , नाटकस्य , विद्यालये , उत्साहवर्धनम् , करोमि , अत्र |

उत्तराणि :- उपरि कथिताः 16 सहायकविषयाः उत्तर - लेखने कथम् सहायकाः भवन्ति इति पश्यामः -
उपरि पठित 16 सहायकविषयाणाम् आधारेण कथम् उत्तरलेखनम् सरलं भवतीति पश्यामः -

सहायक - विषयाः उत्तराणि

1. कः पत्रं लिखति ? / भवान् कः ? ....................
2. कुतः लिखति ? ( i ) दिल्लीतः
3. कं लिखति ? ..................
4. कथं सम्बोधयति ? ..................
5. कथं नमस्कारं करोति ? ..................
6. कथं प्रारम्भः क्रियते ? ( ii ) शुभकामनाः ( प्रथमा विभक्तिः )
7. विषय - प्रस्तुतीकरणम् ..................
8. कर्तृपदम् ( iii ) वार्षिकोत्सवः ( प्रथमा विभक्तिः ) Clue - भविष्यति
   ( vii ) भवान् ( प्र / वि - एकवचनम् ) Clue - आगच्छतु
9. क्रियापदम् ( vi ) करोमि ( क्रिया - उत्तमपुरुष - एकवचनम् ) Clue - अहम्
10. कर्मपदम् ( viii ) उत्साहवर्धनम् ( द्वि / वि - एकवचनम् )
11. विशेषण - पदम् ............................
12. विशेष्य - पदम् ............................
13. अन्यपदानि :- विभक्तिपदानि ( iv ) विद्यालये ( सप्तमी विभक्तिः ),
    ( v ) नाटकस्य ( षष्ठी विभक्तिः )
14. समाप्तिः । प्रणामाः / मात्रे नमः ( ix ) प्रणामान् ( द्वि / वि - बहुवचनम् )
15. कः लिखति । भवतः पुत्रः / पुत्री ............................
16. लेखकस्य नाम किम् ? ( x ) शिवः

**************************************************************************************************

अनेन स्पष्टं भवति यत् मञ्जूषायाः पदानां :- लिङ्ग - विभक्ति - पुरुष - वचन - कर्तृ - क्रिया - आदि पदानां ज्ञानेन पत्रे रिक्तस्थानपूर्तिः सरला भवति इति । अभ्यासेन भवतां विश्वासः वर्धते । पत्रे रिक्तस्थान - वाक्ये एव सहायकपदानि ( Clue Words ) भवन्ति । मञ्जूषापदानाम् आधारेण रिकतस्थानस्य वाक्ये Clue Word मेलनेन च शुद्ध - उत्तर - लेखनं संभवति इति अवगच्छन्तु ।

ध्यातव्यम् :- रिक्तस्थाणात् पूर्वं / परं / वाक्ये सहायकपदस्य ( Clue Word ) आधारेण उत्तरलेखनं भवेत् इति ।

**************************************************************************************************

उत्तराणि :- ( i ) दिल्लीत: ( ii ) शुभकामना: ( iii ) वार्षिकोत्सव: ( iv ) विद्यालये ( v ) नाटकस्य
( vi ) करोमि ( vii ) भवान् ( viii ) उत्साहवर्धनम् ( ix ) प्रणामान् ( x ) शिवः

****************************************************************************************************

पत्रपूरणाय ध्यातव्या: अंशा: :- स्थान , सम्बोधन , कर्तृपद , विशेषण , विशेष्य , क्रियापदै: अन्यपदै: ( = पूरणपदै: ) च पत्रम् रचयत ।

अभ्यासार्थम् पत्रम् :-

Q.NO.2. विद्यालयस्य दशमीकक्षायां प्रवेशार्थं प्रधानाचार्यं प्रति लिखिते प्रार्थनापत्रे मञ्जूषात: समुचित - पदानि चित्वा रिक्तस्थानानि पूरयित्वा पत्रं पुनः लिखत - ½ x 10 = 5

| मञ्जूषा :- सधन्यवादम् , शिष्य: , महोदया: , विगते , दशमीकक्षायाम् , निवेदनम् , भवतां , उत्तीर्ण: , प्रार्थये , जातम् । |
|---|

यमुना - छात्रावास: ,

हैदराबादत: ( स्थानम् )

05 / 06 / 2023

श्रीमन्त: प्रधानाचार्य ( 1 ) .... महोदया: ! .... ( सम्बोधनपदम् )

सविनयं ( 2 ) ... निवेदनम् .... (अन्यपदम् ) अस्ति यत् अहं ( 3 ) .... विगते.... ( विशेषणम् ) वर्षे उप्पल् - प्रान्ते स्थितस्य केन्द्रीय - विद्यालयस्य छात्रः आसम् । अहं नवमीकक्षायां प्रथम - स्थाने ( 4 ) .... उत्तीर्ण: .... ( अन्यपदम् ) अभवम् । मम पितु: स्थानान्तरणम् अत्र ( 5 ) .... जातम् .... ( क्रियापदम् ) । अत: ( 6 ) ..... भवतां .... ( अन्यपदम् ) विद्यालये ( 7 ) ..... दशमीकक्षायाम् .... ( अन्यपदम् ) मह्यं प्रवेशं दत्वा मां अनुगृह्णातु इति ( 8 ) ... प्रार्थये ..... ( क्रियापदम् ) ।

( 9 ) ... सधन्यवादम् ...... ( अन्यपदम् )

भवताम् आज्ञाकारी ( 10 ) .... शिष्य: ..... ( कर्तृपदम् - लेखक: ) ( अन्यपदम् = पूरणपदम् )

उदय: ।

अथवा ( OR )

मञ्जूषाप्रदत्तपदानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभि: संस्कृतवाक्यै: एकम् अनुच्छेदं लिखत ।

" भारतभूमि: "

मञ्जूषा :-

| |
|---|
| अस्माकम् , अयम् , देशः , भारतवर्षम् , हिमालयात् , रामेश्वरपर्यन्तम् , नद्यः , गङ्गा , यमुना , गोदावरी-प्रभृतयः , अत्र , काशी , प्रयागः , मथुरा , तीर्थनगरानि , जाताः , अत्रैव , राम-कृष्ण-गौतमाः , ग्रामप्रधानः , कृषिप्रधानः । |

****************************************************************************************************

Q.NO.3. प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत - 1 X 5 = 5

पाठ्यबिन्दूनां विवरणम् :-

अस्मिन् प्रश्ने ध्यातव्या: विषया: :-

| कर्तृपदम् ( त्रिषु लिङ्गेषु ) | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| 1. चित्रे :- | क: / का / किम् अस्ति ? | कौ / के / के स्त : ? | के / का: / कानि सन्ति ? |
| चित्रे - | बालक: / बालिका / पुष्पम् अस्ति \| | बालकौ / बालिके / पुष्पे स्तः \| | बालका: / बालिका: / पुष्पाणि सन्ति \| |

( एवं चित्रे दृश्यमानानां पदानां प्रथमाविभक्ति - रूपाणि ( कर्तृ पदानि ) लिखन्तु )

2. चित्रे कर्तारः ( कर्तृपदानि / प्रथमाविभक्ति पदानि ) किं किं कुर्वन्ति ? ( तानि क्रियापदानि भवन्ति )
उत्तराणि :- कर्तृपदस्य वचनानुसारं क्रियापदस्य वचनं लिखन्तु ।

यथा :- बालकः क्रीडति / वृक्षाः सन्ति / पुष्पाणि विकसन्ति । एवं कर्तृ - क्रियापदानां ज्ञानं भवति ।
सरलवाक्य - निर्माणार्थं कर्तृ - क्रियापदानां ज्ञानं आवश्यकम् । पश्याम: वाक्यरचनाम् -

| | वाक्यम् | | |
|---|---|---|---|
| | कर्तृपदम् | अन्यपदानि | क्रियापदम् |
| इदानीं क्रियापदस्य आधारेण प्रश्ना: - यथा :- | बालक: / बालकौ / बालका: | ( द्वि / तृ / स / ... वि ) | क्रीडति / ....त: / .....न्ति । |
| बालक: कुत्र क्रीडति ? | बालक: | उद्याने | क्रीडति । |
| बालकौ किं कुरुतः ? | बालकौ | वार्तालापं | कुरुतः । |
| बालकाः कैः सह क्रीडन्ति ? | बालकाः | मित्रै : सह | क्रीडन्ति । |

एवं सन्दर्भानुसारं प्रश्नकरणेन च उत्तराणि मिलन्ति । एवं चित्रस्य वर्णनं कर्तुं / वाक्यविस्तारं कर्तुं शक्यते ।

सूचना :- Q.NO.4. मध्येऽपि अनुवादाय एवमेव करणीयम् / चिन्तनीयम् इति अवगन्तव्यम् ।

नियम: :- * प्रत्येकस्मिन् वाक्ये कर्तृपदस्य पुरुषानुसारं वचनानुसारं च क्रियापदस्य पुरुषः समानः , वचनम् च समानं भवतु ।

स्मरत :-

*( संख्या 1 प्रथमा विभक्तिम् सूचयति । तथा संख्याः , अन्याः विभक्तीः सूचयन्ति ) & ( वर्णः " k " क्रियापदम् सूचयति । )

| | 1 | K |
|---|---|---|
| यथा :- ( प्रथमपुरुषः ) | स: | लिखति । |
| ( मध्यमपुरुषः ) | त्वं | लिखसि । |
| ( उत्तमपुरुषः ) | अहं | लिखामि । |

इदानीं सरल - पदानाम् आधारेण कथं चित्राधारित - वाक्यनिर्माणम् भवति ? इति जानीम: -

यथा :- वाक्य - निर्माणाय अध: प्रदत्त - प्राथमिकस्तर - तालिकां पश्यामः | तदाधारेण अध: प्रदत्तस्य चित्रस्य वर्णनम् पञ्चवाक्यैः कुर्मः -/ पञ्च वाक्यानि रचयाम -



मञ्जूषा :- बालकाः ,वृक्षाः , उद्यानम् , महिलाभिः , दोलायाम् , चलन्ति , व्यायामं , उत्साहेन , पश्यति , सुन्दरम् ।

सरलतया परीक्षायां चित्रवर्णनाय उदाहरणार्थं वाक्यानि दीयन्ते | एतेषामाधारेण वाक्यानि शुद्धरूपेण लेखितुं प्रभवन्ति ।

| उदाहरण - वाक्यानि एवं चितयन्तु | | | चित्र - वर्णन - वाक्यानि |
|---|---|---|---|
| 1. | इदं ..........6........... चित्रम् अस्ति । | 1) | इदं उद्यानस्य / विद्यालयस्य चित्रम् अस्ति । |
| राम: , बालक: , नदी , इत्यादय: | स: , सा , तत् , त्वं , अहं , इत्यादय: | बुद्धिमान् , चतुर: , सुन्दरं , इत्यादय: | पठति , लिखति , वदति , इत्यादय: | सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु ।<br>वचनेषु च सर्वेषु यन्नव्येति तदव्ययम् ॥<br>अर्थ :- तीन लिङ्गों में , सभी विभक्तियों में और सभी वचनों में जो पद ( सदा एक ही पद ) परिवर्तन नहीं होता है उसे अव्यय - पद काते हैं । |

अव्ययस्य निर्वचनम् :- " लिङ्ग - विभक्ति - वचन - शून्यानि अव्यायानि " = सदा एक: शब्द: एक: अर्थ: ।

The words , which are having no Gender ( like Masculine / Feminine ) , no case ( = विभक्ति ) , no Number ( like - singular / plural ) are known as INDICLAINABLE words / अव्ययपदानि .

यथा :-

| कर्तृपदम् | अव्ययपदम् | कर्मपदम् | क्रियापदम् |
|---|---|---|---|
| स: / बालक: सा / बालिका | सदा | संस्कृतं | पठति । |
| ते / बालका: ता: / बालिका: | सदा | संस्कृतं | पठन्ति । |
| त्वं | सदा | फलं | खादसि । |
| यूयम् | सदा | फलानि | खादथ । |
| अहं | सदा | भाषणं | करोमि । |
| वयं | सदा | सत्यं | वदाम: । |

अत्र वाक्येषु कर्तृ - कर्म - क्रिया - पदेषु परिवर्तनं दृश्यते । Here , We can see the change in कर्तृ - कर्म - क्रिया words . परन्तु " सदा " इति पदस्य विकार: न जात: । ( परिवर्तनं न जातम् ) But The Word " सदा " has no change in all the sentences.

अत: " सदा " - इति पदं अविकारी = अव्ययपदं कथ्यते । Therefore the word " सदा " is called as an indeclinable word / " अव्ययपदम् "

अव्ययपदानाम् अर्थानुसारं विभाग: एवं भवति:- The Division of Indeclinable can be done in the following ways based on their meanings .

I . प्रश्नवाचक - अव्ययपदानि । जो अव्यय प्रश्न पूछने का होता है , वह प्रश्नवाचक अव्यय कहलाता है ।

जैसे :- कुत्र ? कदा ?

II . स्थानवाचक - अव्ययपदानि । जो अव्यय स्थान का अर्थ दर्शाता है , वह स्थानवाचक अव्यय कहलाता है ।
जैसे :- अत्र । तत्र ।

III . कालवाचक - अव्ययपदानि । जो अव्यय काल / समय को सूचित करता है , वह कालवाचक अव्यय कहलाता है ।
जैसे :- अद्य । श्व: ।

IV . संयुक्त - अव्ययपदानि । जो अव्यय युग्म / जोडी / pair में प्रयुक्त होते हैं , वे संयुक्त - अव्यय कहलाते हैं ।
जैसे :- यदा - तदा ।

V . विकीर्णानि / अन्य - अव्ययपदानि । जो अव्यय ऊपर बताए गए अव्ययों में नहीं आते हैं , वे अन्य - अव्यय कहलाते हैं ।

जैसे :- च , वृथा ।

| I . प्रश्नवाचक - अव्ययपदानि = अर्थ: च । | | वाक्ये प्रयोग: । | हिन्दी में अनुवाद | Translation |
|---|---|---|---|---|
| 1 | कुत्र = कहां / where | भवान् कुत्र गच्छति ? | आप कहां जाते हो ? | Where are you going ? |
| 2 | कदा = कब / when | त्वं कदा गृहं गच्छसि ? | तुम कब घर जाओगे ? | When will you go home ? |
| 3 | कुत: = कहां से / from where | भवान् कुत: आगच्छति ? | आप कहां से आ रहे हो ? | Where are you coming from ? |

**********************************************************************************************

| II . स्थानवाचक - अव्ययपदानि = अर्थ: च । | | वाक्ये प्रयोग: । | हिन्दी में अनुवाद | Translation |
|---|---|---|---|---|
| 1 | अत्र = यहां / here | वयं अत्र पठाम: । | हम यहां पढ़ते हैं । | We are reading here. |
| 2 | तत्र = वहां / there | वयं तत्र क्रीडाम: । | हम वहां खेलते हैं । | We are playing there |
| 3 | यत्र - तत्र = जहां - वहां Where - there | यत्र जलम् अस्ति तत्र जीवनम् अस्ति । | जहां पानी है वहां जीवन है । | Where ever water exists , there life exists. |

**********************************************************************************************

| III . ( अ ) काल - वाचक - अव्ययपदानि = अर्थ: च । | वाक्ये प्रयोग: । | हिन्दी में अनुवाद | Translation |
|---|---|---|---|
| अद्य = आज / Today | अद्य शुक्रवासर: अस्ति । | आज शुक्रवासर है । | Today is Friday . |
| श्व: = आने वाला कल / Tomorrow | श्व: शनिवासर: भविष्यति । | कल शनिवासर होगा । | Tomorrow will be Saturday . |
| ह्य: = बीता हुआ कल/ Yesterday | ह्य: गुरुवासर: आसीत् । | कल गुरुवासर था । | Yesterday was Thursday . |
| इदानीम् = अब / Now<br>अधुना = अब / Now<br>सम्प्रति = अब / Now<br>साम्प्रतम् = अब / Now | इदानीम् अहं भोजनम् करोमि ।<br>अधुना कक्षाकार्यम् कुरु ।<br>सम्प्रति वार्ता: श्रूयन्ताम् ।<br>साम्प्रतं शिशु: शेते । | अब मैं भोजन करता हूं ।<br>अब कक्षाकार्य करो ।<br>अब समाचार सुनिए ।<br>अब बच्चा सोता है । | Now I am eating .<br>Now do ( your ) Class Work .<br>Now (you ) listen the news .<br>Now the child sleeps . |

**********************************************************************************************

| ( आ ) कालवाचक - संयुक्त - अव्ययपदानि । । ( Pair )। वाक्ये प्रयोग: । हिन्दी में अनुवाद Translation | | | | |
|---|---|---|---|---|
| 5 | यावत् - तावत् = जब तक - तब तक / aslong - till | यावत् धर्म: तावत् सृष्टि: । | जब तक धर्म है तब तक सृष्टि है । | As long as the Dharma exists, (till ) creation exists . |
| 6 | यदा - तदा = जब - तब When - then | यदा सूर्योदय: भवति तदा कमलं विकसति । | जब सूर्योदय होता है तब कमल खिलता है । | When sun raises then the Lotus blooms. |

******************************************************************************************

| IV . संयुक्त - अव्ययपदानि। । ( युग्म - रूपेण प्रयुज्यन्ते ) Pair Conjunctions . | | वाक्ये प्रयोग: । | हिन्दी में अनुवाद | Translation |
|---|---|---|---|---|
| 1 | यदि - तर्हि = अगर - तो If - then | यदि परिश्रमं करोषि तर्हि फलं प्राप्स्यसि । | अगर परिश्रम करते हो तो फल मिलेगा । | If you do your effort , then you will get the result . |

******************************************************************************************

| V . अन्य - अव्ययपदानि । । Other indeclinable. वाक्ये प्रयोग: । हिन्दी में अनुवाद Translation | | | | |
|---|---|---|---|---|
| 1 | उच्चै: = ऊंचे / ज़ोर से Loudly | ये मेघा: उच्चै: गर्जन्ति ते न वर्षन्ति । | जो बादल जोर से गरजते हैं वे नहीं बरसते हैं । | Louder thunder clouds will never rain. |
| 2 | च = और / and | केन्द्रीय विद्यालये बालका: बालिका: च पठन्ति । | केन्द्रीय विद्यालय में लड़के और लड़कियां पढ़ते हैं । | Boys and Girls are studying in Kendriya Vidyalaya. |
| 3 | सहसा = अचानक / suddenly | सहसा विदधीत न क्रियाम् । | अचानक कोई काम नहीं करना चाहिए । | One should not do the work all of a sudden . |
| 4 | वृथा = व्यर्थ / waste | समुद्रे वृष्टि: वृथा । | समुद्र में वर्षा बेकार है । | Raining on sea is of no use. |
| 5 | शनै: = धीरे / slowly | शिशु: शनै: चलति । | बच्चा धीरे चलता है । | The child walks slowly . |
| 6 | इतस्तत: = इधर उधर Here and there | इतस्तत: मा गच्छ । | इधर उधर मत जाओ । | Do not go here and there . |
| 7 | अपि = भी / also | अहं संस्कृतं पठामि त्वम् अपि पठ । | मैं संस्कृत पढ़ता हूं तुम भी पढ़ो । | I am reading Sanskrit , you also read . |

******************************************************************************************

*

## CBSE 2023 - 24 द्वारा प्रदत्त - 26 अव्ययपदानां अभ्यासाय रिक्तस्थानानि पूरयन्तु स्वकक्षाकार्ये च लिखन्तु -

| अव्ययम् | = अर्थ: | वाक्ये प्रयोग: - ( उचित - अव्ययपदेन रिक्तस्थानानि पूरयत - ) | |
|---|---|---|---|
| 1. उच्चै: | = जोर से, ऊंचे | * छात्र: ............... श्लोकं पठति । | * शिशु: ................ रुदति । |
| 2. च | = और | * राम: कृष्ण: ............... गच्छत: । | * स: पत्रम् पुष्पम् .......... नयति । |
| 3. श्व: | = आनेवाला कल | * मम पिता ................. विद्यालयं आगमिष्यति । | * .................. क: वासर: भविष्यति ? |
| 4. ह्य: | = बीता हुआ कल | * नगरे ............. वर्षा अभवत् । | * ............ क: वासर: आसीत् ? |
| 5. अद्य | = आज | * ......... अहं मन्दिरं गच्छामि । | * ............... क: वासर: अस्ति ? |
| 6. अत्र | = यहां | * बाला: ........... कोलाहलं कुर्वन्ति । | * माता .............. किं करोति ? |
| 7. तत्र | = वहां | * दूरे ............... वृक्षा: दृश्यन्ते । | * ................ के क्रीडन्ति ? |
| 8. यत्र | = जहां | * ............... जलम् अस्ति तत्र जीवनं भवति । | * ......... मन्दिरं तत्र भक्ता: । |
| 9. कुत्र | = कहां | * तव गृहं ............... अस्ति ? | * छात्रा: ............ क्रीडन्ति ? |
| 10. इदानीम् | = अब | * .................. त्वं किं करोषि ? | * ............... अहं लिखामि । |
| 11. अधुना | = अब | * ............. भवान् कुत्र गच्छति ? | * स: ................ पाठं पठति । |
| 12. सम्प्रति | = अब | * गज: .............. किं करोति ? | * सा ............ दूरदर्शनम् पश्यति । |
| 13. साम्प्रतम् | = अब | * त्वं ................... ग्रामं गच्छ । | * माता .................. पचति । |
| 14. यदा | = जब | * ............. सूर्य: आगच्छति तदा प्रकाश: भवति । | * यदा अध्यापक: आगच्छति ........ छात्रा: पठन्ति । |
| 15. तदा | = तब | * यदा पिता आगच्छति .......... पुत्र: पठति । | * ..... जन: अस्वस्थ: भवति ..... चिकित्सालयं गच्छति । |
| 16. कदा | = कब | * जना: ........... भोजनम् कुर्वन्ति ? | * कोकिल: ............. कूजति ? |
| 17. सहसा | = अचानक | * ........... अविचार्य कार्यं न कुर्वीत । | * ................ वर्षा भवति । |
| 18. वृथा | = व्यर्थ / बेकार | * समुद्रे वर्षा ............. भवति । | * लोके ............. किमपि नास्ति । |
| 19. शनै: | = धीरे | * गज: ............ चलति । | * शिशु: ................ खादति । |
| 20. अपि | = भी | * स: क्रीडति , अहं ......... क्रीडामि । | * पुत्रेण सह माता ........... गच्छति । |
| 21. कुत: | = कहां से | * नद्य: ............. प्रवहन्ति ? | * फलं .................... पतति ? |

केन्द्रीय विद्यालय संगठन

22. इतस्ततः = इधर उधर * छात्राः ............... भ्रमन्ति । * वानराः .................... कूर्दन्ति ।

23. यदि = अगर * जनः ................. प्रयत्नम् करोति तर्हि फलं प्राप्नोति ।

24. तर्हि = तो * यदि छात्रः सम्यक् पठति .......... प्रथम - श्रेण्याम् उत्तीर्णः भविष्यति ।

25. यावत् = जब तक * ................. पिता न आगच्छति तावत् पुत्रः न खादति ।

26. तावत् = तब तक * यावत् अध्यापकः न वदति .................... छात्रः न पठति ।

*************************************************************************************************

Q.No.10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत -

( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

मञ्जूषा :- तर्हि , अपि , संप्रति , कुत्र ।

मोहनः :- रमेश ! त्वं गृहात् ....................... गच्छसि ?

रमेशः :- अहं ....................... मम गृहं गच्छामि ।

मोहनः :- यदि त्वं विलम्बेन गृहं गच्छसि ........... माता किं वदति ?

रमेशः :- मम माता किम् ........... न पृच्छति ।

Q.No.10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत -

( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

मञ्जूषा :- कुतः , यावत् , वृथा , कदा ।

क ) सः ................... तिरुपतिं गमिष्यति ?

ख ) त्वं ..................... समागतोऽसि ?

ग ) ............. परोपकारः क्रियते तावत् शरीरस्य उपयोगः भवति ।

घ ) समयं ........... न यापय ।

Q.No.10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत -

( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

मञ्जूषा :- अधुना , ह्यः , अपि , इतस्ततः ।

क ) बालिकाः ..................... क्रीडां द्रष्टुम् अगच्छन् ।

ख ) ............. संस्कृत - कक्षा चलति ।

ग ) वने पशवः ............ भ्रमन्ति ।

घ ) बालकाः क्रीडन्ति बालिकाः ........... क्रीडितुम् इच्छन्ति ।

**********************************************************************************************

Q.NO. 11. वाक्यसंशोधनम् ( बहुविकल्पात्मक: प्रश्न: M C Qs ) 3 अङ्का:

****************************************************************************************

CBSE द्वारा वाक्य - संशोधनाय निर्धारित अंशा: :-
* लिङ्ग - पुरुष - वचन - लकार - विभक्ति - दृष्ट्या रेखाङ्कित - पद - संशोधनम् ।

Q.NO. 11. अधोलिखितवाक्येषु रेखांकितपदम् अशुद्धम् अस्ति । शुद्धं पदं विकल्पेभ्य: चिनुत -
( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

पाठ्यबिन्दूनां विवरणम् उदाहरणानि च :-

अशुद्धि - संशोधनम् :- कथं करणीयम् ?

निम्नलिखित - सामान्य - विषयाणां अवलोकनम् अभ्यासं च कुर्म: ।

* प्रत्येकस्मिन् वाक्ये अशुद्ध - पद - संशोधनाय लिङ्ग / पुरुष / वचन / लकार / विभक्ति - दृष्ट्या सहायक - पदं भवति ।

* सहायकपदस्य आधारेण लिङ्ग / पुरुष / वचन / लकार - दृष्ट्या वाक्यस्य संशोधनं करणीयम् ।

अध: लिङ्ग - पुरुष - वचन - लकार - दृष्ट्या सहायक - पद तालिका दत्ता :- पश्याम: तावत् :-

| कर्तृपदम् | | | | | क्रियापदम् |
|---|---|---|---|---|---|
| लिङ्ग: | पुरुष: | एकवचनम् | द्विवचनम् | बहुवचनम् | क्रियापदस्य लट् - लकार - प्रत्यया: |
| पुं | प्रथम | स: / बाल: | तौ / बालौ | ते / बाला: | लिखति / लिखत: / लिखन्ति \| |
| स्त्री | प्रथम | सा / लता | ते / लाते | ता: / लता: | नृत्यति / ..... त: / ...... अन्ति \| |
| नपुं | प्रथम | तत् / पुष्पम् | ते / पुष्पे | तानि / पुष्पाणि | विकसति / ..... त: / ...... अन्ति \| |
| त्रिषु | मध्यम | त्वम् | युवाम् | यूयम् | पश्यसि / ..... थ: / ...... थ \| |
| त्रिषु | उत्तम | अहम् | आवाम् | वयम् | वदामि / .... आव: / .... आम: \| |

****************************************************************************************

अभ्यासाय :-

दृष्ट्या अशद्धपदम् सहायकपदम् शुद्धपदम् / उत्तरम्

लिङ्ग - दृष्ट्या :- <u>स:</u> बालिका वृक्षं सिञ्चति ।

( सहायकपदम् - संज्ञापदं - बालिका ) सा बालिका वृक्षं सिञ्चति ।

पुरुष - दृष्ट्या :- यूयं संस्कृतम् <u>लिखन्ति</u> ।

( सहायकपदम् - कर्तृपदं यूयम् , मध्यमपुरुष - बहुवचनम् अस्ति ) यूयं संस्कृतम् लिखथ।

वचन - दृष्ट्या :- <u>वयं</u> सदा सत्यं वदामि।

( सहायकपदम् - क्रियापदं वदामि उत्तमपुरुष- एकवचनम् अस्ति ) अहं सदा सत्यम् वदामि।

लकार - दृष्ट्या :- सहायक - अव्यय - पदानि -

* लकार - दृष्ट्या क्रियापद - संशोधनाय सहायक - अव्ययपदानि भवन्ति ।

**** तेषाम् अव्ययानाम् आधारेण एव क्रियापद - संशोधनं भवति ।

*** वाक्ये " ह्यः " इति अव्ययस्य आधारेण अशुद्ध - क्रियापदस्य संशोधनं लङ् लकारे भवति / करणीयम् ।
यथा :- छात्रः ह्यः विद्यालयं न गमिष्यति । छात्रः ह्यः विद्यालयं न अगच्छत् ।

*** वाक्ये " श्वः " इति अव्ययस्य आधारेण अशुद्ध - क्रियापदस्य संशोधनं लृट् लकारे भवति / करणीयम् ।
यथा :- छात्रः श्वः विद्यालयं न अगच्छत् । छात्रः श्वः विद्यालयं न गमिष्यति ।

*** वाक्ये " अद्य " इति अव्ययस्य आधारेण अशुद्ध - क्रियापदस्य संशोधनं लट् लकारे भवति / करणीयम् ।
यथा :- छात्रः अद्य विद्यालयं अगच्छत् । छात्रः अद्य विद्यालयं गच्छति ।

**********************************************************************************************

विभक्ति - दृष्ट्या :- वाक्ये रेखाङ्कित - अशुद्ध - पदस्य संशोधनाय शब्दरूपाणां ज्ञानम् विभक्तेः अनुसारं करणीयम् ।

*** बालकः गृहस्य गच्छति | ( गृहेण , गृहाय , गृहं )

*** बालकः गृहं गच्छति | ** कुत्र गच्छति ? गृहं | एवं अभ्यासः करणीयः |

**********************************************************************************************

अवबोधाय अधः प्रदत्त - वाक्यानि अवगच्छन्तु उदाहरणासारं शुद्धवाक्यानि च लिखन्तु |
एवमेव परीक्षायामपि चिन्तयित्वा प्रदत्त - विकल्पेभ्यः शुद्धम् उत्तरं चिनुत |

| | अशुद्धपदम् | दृष्ट्या | सहायकपदम् | शुद्धपदं लिखत |
|---|---|---|---|---|
| 1 ) | तौ किं लिखन्ति । | .... वचन ...... | ..... तौ ....... | .... लिखतः ...... |
| 2 ) | वयं पुष्पोत्सवं पश्यन्ति । | .................... | .................... | .................... |
| 3 ) | मे बहूनि अपत्याः सन्ति । | ................... | .................... | .................... |
| 4 ) | मम पिता श्वः दिल्लीम् अगच्छत् । | ............... | .................... | .................... |

**********************************************************************************************

अत्र अशुद्ध - पद - संशोधनाय सहायक - पदम् कथमुपकरोति इति तालिका - माध्यमेन पश्यामः :-

| संख्या | अशुद्धपदम् | दृष्ट्या | सहायक - पदम् | शुद्धम् पदम् / उत्तरम् | शुद्धम् वाक्यम् अत्र लिखत - |
|---|---|---|---|---|---|
| 1 | लिखन्ति | वचन | तौ ( द्विवचनम् ) | लिखतः | |
| 2 | पश्यन्ति | पुरुष | वयं ( उत्तम-पुरुष ) | पश्यामः | |
| 3 | अपत्याः | लिङ्ग | बहूनि ( नपुंसकम् ) | अपत्यानि | |
| 4 | अगच्छत् | लकार | श्वः ( लृट् ) | गमिष्यति | |

**********************************************************************************************

Q.NO.11. अधोलिखित - वाक्येषु रेखाङ्कितं पदम् अशुद्धम् अस्ति । शुद्धं पदं विकल्पेभ्यः चिनुत -
( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

क ) माता भोजनं पचन्ति । ( पचसि / पचामि / पचति ) ........................................

ख ) केशवः ह्यः पुस्तकालयं गमिष्यति । ( अगच्छः / अगच्छत् / अगच्छम् ) ..........................................

ग ) उद्याने सुन्दराः पुष्पाणि दृश्यन्ते । ( सुन्दरम् / सुन्दराणि / सुन्दरे ) ........................................

घ ) युवां कदा गृहकार्यं कुर्वन्ति । ( कुरुथः / करोमि / करोषि ) ..........................................

**********************************************************************************************

## " घ " खण्ड: ( SECTION D ) पठित - अवबोधनम् 30 अङ्का:

सूचना :- See Q.NO.1 & 15 ( प्रश्ननिर्माणम् ) for basics to get full marks and to write correct answers from the given text only ( in the question paper ).

******************************************************************************************

**Q.NO.12.** पठित - गद्यांशः - 5 अङ्काः ( अभ्यासाय पठित - गद्यपाठाः :- 2 , 5 & 8 )

द्वितीय: - पाठ: बुद्धिर्बलवती सदा ।

******************************************************************************************

अनुच्छेद: - 1

अस्ति देउलाख्यो ग्राम: । तत्र राजसिंह: नाम राजपुत्र: वसति स्म । एकदा केनापि आवश्यककार्येण तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं प्रति चलिता । मार्गे गहनकानने सा एकं व्याघ्रं ददर्श । सा व्याघ्रमागच्छन्तं दृष्ट्वा धाष्ट्यात् पुत्रौ चपेटया प्रहृत्य जगाद - " कथमेकैकशो व्याघ्रभक्षणाय कलहं कुरुथ: ? अयमेकस्तावद्विभज्य भुज्यताम् । पश्चाद् अन्यो द्वितीय: कश्चिल्लक्ष्यते " इति श्रुत्वा व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो नष्ट: ।

*****************************************************

( अनुवाद: :- देउल नामक गांव है । वहां राजसिंह नामक राजपुत्र रहता था । एक बार किसी जरूरी काम से उसकी भार्या बुद्धिमती दो पुत्रों के साथ पिता की घर की ओर चल पड़ी । मार्ग में घने जंगल में उसने एक बाघ देखा । उसने बाघ को आता हुआ देखकर धृष्टता से दोनों पुत्रों को थप्पड़ मारकर कहा - ' एक ही बाघ को खाने के लिए तुम दिनों क्यों विवाद कर रहे हो ? इस एक ही बाघ को बांटकर खा लो । बाद में अन्य दूसरा कोई खोजा जाएगा ' । एसा सुनकर यह कोई बाघ को मारने वाली है यह मानकर बाघ भय से व्याकुल चित्त वाला होकर भाग गया । )

******************************************************************************************

( i ) एकपदेन उत्तरत :- ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) ग्रामस्य नाम किम् ?

( ख ) भार्या कीदृशी आसीत् ?

( ग ) सा मार्गे कं ददर्श ?

( ii ) पूर्णवाक्येन उत्तरत :- ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) राजपुत्रस्य भार्या कुत्र चालिता ?

( ख ) सा पुत्रौ चपेटया प्रहृत्य किं जगाद ?

( ग ) सा व्याघ्रमागच्छन्तं दृष्ट्वा किम् अकरोत् ?

( iii ) भाषिककार्यम् - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " अरण्ये " इति अर्थे किं पदम् अस्ति ?

( ख ) " अस्ति देउलाख्यो ग्राम: " अस्मिन् वाक्ये क्रियापदं किम् ?

( ग ) " व्याघ्रम् आगच्छन्तं " अत्र अनयोः पदयोः विशेषणपदम् किम् ?

******************************************************************************************

उत्तराणि :- I. देउलाख्यः , बुद्धिमती , व्याघ्रं | II. ... पितुः गृहं ... | ... " कथमेकैकशो ..... लक्ष्यते " इति | ... धाष्ट्यात् पुत्रौ चपेटया प्रहृत्य जगाद | III. कानने , अस्ति , आगच्छन्तं |

******************************************************************************************

अनुच्छेद: - 2

निजबुद्ध्या विमुक्ता सा भयाद् व्याघ्रस्य भामिनी ।
अन्योऽपि बुद्धिमाँल्लोके मुच्यते महतो भयात् ॥

भयाकुलं व्याघ्रं दृष्ट्वा कश्चित् धूर्त: श्रृगाल: हसन्नाह - " भवान् कुत: भयात् पलायित: ? " ।

व्याघ्र: :- गच्छ , गच्छ जम्बुक ! त्वमपि किञ्चिद् गूढप्रदेशम् । यतो व्याघ्रमारीति या शास्त्रे श्रूयते तयाहं हन्तुमारब्ध: परं गृहीतकरजीवितो नष्ट: शीघ्रं तदग्रत: ।

शृगाल: :- व्याघ्र ! त्वया महत्कौतुकम् आवेदितं यन्मानुषादपि बिभेषि ?

*****************************************************

( अनुवाद: :- वह स्त्री अपनी बुद्धि द्वारा बाघ से बच गई । अन्य बुद्धिमान भी इसी तरह अपनी बुद्धि से इस संसार में महान भाय से छूट जाते हैं । हाय से व्याकुल बाघ को देखकर कोई धूर्त सियार हंसते हुए बोला - ‘ आप कहां से डर कर भागे हो ?

बाघ :- जाओ , जाओ सियार ! तुम भी किसी गुप्त स्थान में छिप जाओ , क्यों कि मैं ने जिस बाघ मारने वाली ( व्याघ्रमारी ) के विषय में शास्त्र में सुना है ( उसी ने मुझे मारना प्रारंभ किया ) परन्तु अपनी जान ( प्राण ) हाथ में रखकर मैं उसके आगे से तेजी से शीघ्र भाग आया ।

सियार :- हे बाघ ! तुमने बहुत आश्चर्य की बात बताई कि तुम मनुष्य से डरते भी हो ?

***********************************************************************************************************************

( i ) एकपदेन उत्तरत :- ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) सा कथं व्याघ्रभयात् विमुक्ता ?

( ख ) क: भयाकुलचित्त: पलायित: ?

( ग ) शृगाल: कीदृशं व्याघ्रं दृष्ट्वा आह ?

( ii ) पूर्णवाक्येन उत्तरत :- ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) व्याघ्रं दृष्ट्वा श्रृगाल: हसन् किम् आह ?

( ख ) लोके क: महत: भयात् मुच्यते ?

( ग ) व्याघ्र: जम्बुकं कुत्र गन्तुम् अवदत् ?

( iii ) भाषिककार्यम् - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) “ बुद्धिहीनः ” इति पदस्य विलोमपदं श्लोके किम् अस्ति ?

( ख ) “ महतः भयात् ” अत्र अनयोः पदयोः विषेष्यपदं किम् ?

( ग ) “ गच्छ , गच्छ जम्बुक ! ” इत्यस्मिन् वाक्ये क्रियापदं किम् ?

***********************************************************************************************************************

उत्तराणि :- I. निजबुद्ध्या , व्याघ्रः , भयाकुलं | II. ... - “ भवान् कुत: भयात् पलायित: ? ” | ... बुद्धिमान् ... | ... गूढप्रदेशम् ... | III. बुद्धिमान् , भयात् , गच्छ |

***********************************************************************************************************************

अनुच्छेद: - 3

व्याघ्र: :- प्रत्यक्षमेव मया सात्मपुत्रावेकैकशो मामत्तुं कलहायमानौ चपेटया प्रहरन्ती दृष्टा ।

जम्बुक: :- स्वामिन् ! यत्रास्ते सा धूर्ता तत्र गम्यताम् । व्याघ्र ! तव पुन: तत्र गतस्य सा सम्मुखमपीक्षते यदि , तर्हि त्वया अहं हन्तव्य: इति ।

व्याघ्र: :- श्रृगाल ! यदि त्वं मां मुक्त्वा यासि तदा वेलाप्यवेला स्यात् ।

जम्बुक: :- यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम् । स व्याघ्र: तथाकृत्वा काननं ययौ। श्रृगालेन सहितं पुनरायान्तं व्याघ्रं दूरात् दृष्ट्वा बुद्धिमती चिन्तितवती - जम्बुककृतोत्साहाद् व्याघ्रात् कथं मुच्यताम् ?

*****************************************************************

( अनुवाद: :- बाघ :- मेरे सामने ही उस के दोनों पुत्र मुझे एक - एक खाने के लिए विवाद कर रहे थे। मेरे द्वारा वह दोनों को एक एक चाटा मारते हुए देखी गई ।

सियार :- हे स्वामी ! जहां वह धूर्त स्त्री है वहां जाना चाहिए । बाघ ! तुम्हारे फिर से वहां जाने पर यदि वह सम्मुख देखे भी तो मुझे मार देना ।

बाघ :- सियार ! तुम मुझे छोड़कर जाते हो तब समय भी कुसमय हो जाएगा ।

सियार :- यदि ऐसा है तो मुझे गले में बांधकर शीघ्र चलो । वह बाघ वैसा ही करके जंगल को गया । सियार के साथ बाघ को फिर से आते हुए दूर से देखकर बुद्धिमती ने सोचा - सियार के द्वारा उत्साहित किए गए बाघ से कैसे छुटकारा पाया जाए ? )

*****************************************************************************************************************

( i ) एकपदेन उत्तरत :- ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) " स्वामिन् " इति कः सम्बोधयति ?

( ख ) व्याघ्रमारी कीदृशी आसीत् ?

( ग ) का अवेला स्यात् ?

( ii ) पूर्णवाक्येन उत्तरत :- ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) बुद्धिमती किं चिन्तितवती ?

( ख ) व्याघ्रः जम्बुकं प्रति किं कथयति ?

( ग ) व्याघ्रेण प्रत्यक्षमेव किं दृष्टम् ?

( iii ) भाषिककार्यम् - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " श्रृगाल ! यदि त्वं मां मुक्त्वा यासि " अत्र कर्तृपदं किम् ?

( ख ) " आयान्तं व्याघ्रं " इति अनयोः पदयोः विषेष्यपदं किम् ?

( ग ) " परोक्षं " पदस्य विलोमपदम् किम् ?

*****************************************************************************************************************

उत्तराणि :- I. जम्बुकः , धूर्ता , वेला | II. ... " जम्बुककृतो .. मुच्यताम् ? " इति | ... " शृगाल ! ... स्यात् " इति | III. त्वं , व्याघ्रं , प्रत्यक्षम् |

*****************************************************************************************************************

अनुच्छेदः - 4

परं प्रत्युत्पन्नमतिः सा जम्बुकमाक्षिपन्त्यङ्ल्या तर्जयन्त्युवाच -

1. रे रे धूर्त ! त्वया दत्तं मह्यं व्याघ्रत्रयं पुरा ।
विश्वास्याद्यैकमानीय कथं यासि वदाधुना ॥

2. इत्युक्त्वा धाविता तूर्णं व्याघ्रमारी भयङ्करा ।
व्याघ्रोऽपि सहसा नष्टः गलबद्ध श्रृगालकः ॥

एवं प्रकारेण बुद्धिमती व्याघ्रजाद् भयात् पुनरपि मुक्ताऽभवत् ।
अत एव उच्यते -

" बुद्धिर्बलवती तन्वि सर्वकार्येषु सर्वदा ॥ "

*****************************************************************

( अनुवादः :- परंतु प्रत्युत्पन्नमति उस स्त्री ने सियार को धमकाते हुए कहा -

1. अरे अरे धूर्त तूने मुझे पहले तीन बाघ दिए थे , विश्वास दिलाकर के भी आज इस समय एक ही लेकर आया , ऐसा कैसा जाते हो , अब बोल ।

2. ऐसा कहकर बाघ को मारने वाली भय को उत्पन्न करने वाली शीघ्र दौड़ी , अचानक बाघ भी गले में बंधे हुए सियार को लेकर भागा ।

इस प्रकार से बुद्धिमती बाघ के भय से फिर भी मुक्त हुई । इस लिए कहा जाता है -
" हे कोमल अंगों वाली ! ' सदैव सभी कार्यों में बुद्धि ही बलवती होती है ' ।

*****************************************************************************************************************

( i ) एकपदेन उत्तरत :- ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) " रे रे धूर्त ! " इति कः सम्बोधयति ?

( ख ) सा जम्बुकं कथं / कया तर्जयति ?

( ग ) कीदृशः व्याघ्रः सहसा नष्टः ?

( ii ) पूर्णवाक्येन उत्तरत :- ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) सर्वकार्येष्वपि का बलवती भवति ?

( ख ) सा जम्बुकं किम् उक्त्वा धाविता ?

( ग ) बुद्धिमती कस्मात् पुनरपि मुक्ताऽभवत् ?

( iii ) भाषिककार्यम् - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) "सा जम्बुकमाक्षिपन्त्यङ्ल्या तर्जयन्त्युवाच" अत्र कर्तृपदं किम् ?

( ख ) "व्याघ्रजाद् भयात्" अत्र विशेषणपदं किम् ?

( ग ) "श्वः" इति पदस्य विलोमपदं श्लोके किम् अस्ति ?

****************************************************************************************************

उत्तराणि :- I. व्याघ्रमारी , अङ्गुल्या , गालबद्धशृगालकः | II. ...... बुद्धिः ... | ... रे रे धूर्त ! ...... वदाधुना" इति .... | ... व्याघ्रजाद् भयात् ... | III. सा , व्याघ्रजात् , अद्य |

****************************************************************************************************

अनुच्छेदः - 1 पञ्चमः - पाठः । जननी तुल्यवत्सला ।

****************************************************************************************************

कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत् । तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः जवेन गन्तुमशक्तश्चासीत् । अतः कृषकः तं दुर्बलं वृषभं तोदनेन नुद्यमानः अवर्तत । सः ऋषभः हलमूढ्वा गन्तुमशक्तः क्षेत्रे पपात । क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारं यत्नमकरोत् । तथापि वृषः नोत्थितः। भूमौ पतितं स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातुः सुरभेः नेत्राभ्यामश्रूणि आविरासन् । सुरभेरिमामवस्थां दृष्ट्वा सुराधिपः तामपृच्छत् - " अयि शुभे ! किमेवं रोदिषि ? उच्यताम् " इति ।

( अनुवादः :- कोई किसान बैलों से खेत जोत रहा था । उन बैलों में एक बैल शरीर से कमज़ोर वेग से चलने में असमर्थ था। इसलिए किसान उस कंजोर बैल को कष्ट से धकेल रहा था । वह बैल हल को उठा करके चलने में असमर्थ होने पर खेत में गिर गया ।क्रोधित किसान ने उस बैल को उठाने का बहुत बार प्रयत्न किया । फिर भी वह बैल नहीं उठा । भूमि पर गिरे अपने पुत्र को देखकर सब गायों की माता सुरभि के नेत्रों से आंसू आने लगे । सुरभि की इस अवस्था को देखकर इन्द्र ने उससे पूछा - "हे शुभ लक्षणों वाली ! क्यों इसप्रकार रो रही हो ? कहो " । )

( i ) एकपदेन उत्तरत :- ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) कृषकः काभ्यां क्षेत्रकर्षणं करोति ?

( ख ) तयोः एकः बलीवर्दः केन दुर्बलः आसीत् ?

( ग ) ऋषभः हलमूढ्वा कुत्र पपात ?

( ii ) पूर्णवाक्येन उत्तरत :- ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) कृषकः बलीवर्दाभ्यां किं कुर्वन्नासीत् ?

( ख ) सुराधिपः सुरभिं किम् अपृच्छत् ?

( ग ) कृषीवलः वृषभम् उत्थापयितुं किम् अकरोत् ?

( iii ) भाषिककार्यम् - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) "अवर्तत" इति क्रियापदस्य कर्तृपदं किम् ?

( ख ) "क्रुद्धः कृषीवलः" अत्र विशेषणपदं किम् ?

( ग ) "पृथिव्याम्" इति पदस्य पर्यायपदं श्लोके किम् असि ?

केन्द्रीय विद्यालय संगठन

****************************************************************************************************

अनुच्छेदः - 2 सा च - " विनिपातो न वः कश्चिद् दृश्यते त्रिदशाधिपः ।
अहं तु पुत्रं शोचामि तेन रोदिमि कौशिक ! ॥

" भो वासव ! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि । सः दीन इति जानन्नपि कृषकः तं बहुधा पीडयति। सः कृच्छ्रेण भारमुद्वहति। इतरमिव धुरं वोढुं सः न शक्नोति। एतत् भवान् पश्यति न ?" इति प्रत्यवोचत् । "भद्रे ! नूनम् । सहस्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन्नेव एतादृशं वात्सल्यं कथम् ?"

( अनुवाद :- और वह - " हे कौशिक ! तीनों दशाओं के राजा इन्द्र ! तुम्हारा कोई कष्ट नहीं दिखाई देता , मैं तो पुत्र के कारण दु:खी हूं इस लिए रोती हूं " । हे देवराज इन्द्र ! पुत्र की दीनता को देखकर मैं रो रही हूं । " वह बैल दीन / कमजोर है " करके जानता हुआ भी किसान उसे उसे ( बैल को ) बहुत बार पीड़ा देता है । यह आप देखते है न " । ऐसा उत्तर दिया । हे प्रिये ! अवश्य ही। हजारों से अधिक पुत्रों के होने पर भी तुम्हारा ऐसा प्रेम इसी में क्यों है ? )

( i ) एकपदेन उत्तरत :- ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) पुत्रस्य दैन्यं दृष्ट्वा का रोदिति ?

( ख ) कृषक: कं बहुधा पीडयति ?

( ग ) वृषभ: कथं भारमुद्वहति ?

( ii ) पूर्णवाक्येन उत्तरत :- ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) इन्द्र: सुरभिं किम् अपृच्छत् ?

( ख ) स: किम् उद्वहति ?

( ग ) सुरभि: इन्द्रं किम् अवदत् ?

( iii ) भाषिककार्यम् - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " उद्वहति " इति क्रियापदस्य कर्तृपदं किम् ?

( ख ) " सहस्राधिकेषु पुत्रेषु " अत्र विशेष्यपदं किम् ?

( ग ) " कष्टेन " इत्यर्थे विलोमपदं श्लोके किम् प्रयुक्तम् ?

*********************************************************************************************

Q.NO.16. मञ्जूषाया: सहायतया अधोलिखितश्लोकस्य अन्वयं पूरयत - 1 x 4 = 4

मञ्जूषा :- विनिपात: , अहं , तेन , त्रिदशाधिप: ।

अन्वय: :- कौशिक ! ........ , कश्चिद् व: ..... न दृश्यते । ....... तु पुत्रं शोचामि ....... रोदिमि ।

*********************************************************************************************************************

अनुच्छेद: - 3 इति इन्द्रेण पृष्टा सुरभि: प्रत्यवोचत् -

" यदि पुत्रसहस्रं मे सर्वत्र सममेव मे ।

दीनस्य तु सत: शक्र ! पुत्रस्याभ्यधिका कृपा ॥ "

" बहून्यपत्यानि मे सन्तीति सत्यम् । तथाप्यहमेतस्मिन् पुत्रे विशिष्य आत्मवेदनामनुभवामि । यतो हि अयमन्येभ्यो दुर्बल: । सर्वेष्वपत्येषु जननी तुल्यवत्सला एव । तथापि दुर्बले सुते मातु: अभ्यधिका कृपा सहजैव " इति ।

( अनुवाद: :- ऐसा इन्द्र के द्वारा पूछे जाने पर सुरभि ने उत्तर दिया - " हे देवराज इन्द्र ! जबकि हमारे हजारों पुत्र मेरे लिए सभी जगह समान ही हैं । तब भी कमजोर पुत्र के ऊपर मेरी अधिक कृपा / दया है " । " मेरी बहुत संतानें है , यह सत्य है । तो भी मैं इस पुत्र में अपने विशेष दु:ख / दर्द को अनुभव करती हूं । क्योंकि निश्चित रूप से यह दूसरों से दुर्बल है । सभी संतानों में मां समान रूप से प्रेम करने वाली होती है। तो भी दुर्बल पुत्र पर मां की अधिक कृपा सहज रूप से होती है " । )

( i ) एकपदेन उत्तरत :- ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) कीदृशे सुते मातु: अभ्यधिका कृपा ?

( ख ) सर्वेष्वपत्येषु का तुल्यवत्सला भवति ?

( ग ) सुरभि: विशिष्य किम् अनुभवति ?

( ii ) पूर्णवाक्येन उत्तरत :- ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) इन्द्रेण पृष्टा सुरभि: किं प्रत्यवोचत् ?

( ख ) सुरभि: कस्मिन् आत्मवेदनाम् अनुभवति ?

(ग) कीदृशे सुते मातु: अभ्यधिका कृपा भवति ?

(iii) भाषिककार्यम् - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) "सुरभिः" इति कर्तृपदस्य क्रियापदं किम् ?

(ख) "अभ्यधिका कृपा सहजैव" अत्र विशेष्यपदं किम् ?

(ग) "पुत्रे" इति अर्थे श्लोके पर्यायपदं किम् अस्ति ?

**********************************************************************************************

Q.NO.16. मञ्जूषायाः सहायतया अधोलिखितश्लोकस्य अन्वयं पूरयत - 1 x 4 = 4

मञ्जूषा :- मे , दीनस्य , अभ्यधिका , शक्र ! ।

अन्वय: :- ............ ! , यदि मे पुत्रसहस्रं , ............ सर्वत्र सममेव । (परं) तु ............. पुत्रस्य सत: ......... कृपा (भवति) ।

**********************************************************************************************

अनुच्छेदः - 4

सुरभिवचनं श्रुत्वा भृशं विस्मितस्याखण्डलस्यापि हृदयमद्रवत् । स च तामेवमसान्त्वयत् - "गच्छ वत्से ! सर्वं भद्रं जायेत।" अचिरादेव चण्डवातेन मेघरवैश्च सह प्रवर्ष: समजायत । पश्यत: एव सर्वत्र जलोपप्लव: सञ्जात: । कृषक: हर्षातिरेकेण कर्षणविमुख: सन् वृषभौ नीत्वा गृहमगात् ।

" अपत्येषु च सर्वेषु जननी तुल्यवत्सला ।
पुत्रे दीने तु सा माता कृपार्द्रहृदया भवेत् " ॥

(अनुवादः :- ऐसा सुरभि के वचन को सुनकर हैरान देवराज इन्द्र का भी हृदय पिघल गया । और वह उसे (सुरभि को) इस तरह से ही सान्त्वना दी - " हे पुत्री ! जाओ ! सब कुछ ठीक हो जाए " । जल्दी ही वेग युक्त हवा से बादलों की गर्जना के साथ वर्षा हुई । देखते ही सब जगह जलसंकट हो गया । किसान खुशी से भर करके जोतने के काम से विमुख होकर के बैलों को ले करके घर गया । माता का प्रेम सभी बच्चों पर समान होता है । परन्तु कम्जोर पुत्र पर माता का हृदय अधिक कृपा युक्त होता है ।)

(i) एकपदेन उत्तरत :- (केवलं प्रश्नद्वयम्) ½ x 2 = 1

(क) केन प्रवर्ष: समजायत ?

(ख) कृषक: कथं कर्षणविमुख: अभवत् ?

(ग) कृषक: वृषभौ नीत्वा कुत्र अगच्छत् ?

(ii) पूर्णवाक्येन उत्तरत :- (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) देवेन्द्र: तां कथम् असान्त्वयत् ?

(ख) अचिरादेव कथं प्रवर्ष: समजायत ?

(ग) जननी केषु तुल्यवत्सला भवति ?

(iii) भाषिककार्यम् - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) "प्रवर्षः" इति कर्तृपदस्य क्रियापदं किम् ?

(ख) "जननी तुल्यवत्सला" अत्र विशेषणपदं किम् ?

(ग) "कल्याणं" इति पदस्य पर्यायपदं श्लोके किम् अस्ति ?

**********************************************************************************************

Q.NO.16. मञ्जूषायाः सहायतया अधोलिखितश्लोकस्य अन्वयं पूरयत - 1 x 4 = 4

मञ्जूषा :- पुत्रे , जननी , भवेत् , सर्वेषु ।

अन्वयः :- ......... च अपत्येषु ........... तुल्यवत्सला (भवति) । (परं) दीने ............ तु

सा माता कृपार्द्रहृदया ............. ।

**********************************************************************************************

उत्तराणि :- पाठः - 5 - अनुच्छेद - 1 :- Q.NO.12 . I.- बलीवर्दाभ्याम् , शरीरेण , क्षेत्रे । II.- .... क्षेत्रकर्षणम् .... । .... " अयि शुभे ! किमेवं रोदिषि ? उच्यताम् " इति .... । .... बहुवारं यत्नम् अकरोत् । III. कृषकः , क्रुद्धः , = भूमौ |
अनुच्छेद - 2 :- Q.NO.12 . I.- सुरभिः , बलीवर्दं , कृच्छ्रेण । II.- .... " भद्रे ! नूनम् । सहस्राधिकेषु पुत्रेषु सत्स्वपि तव अस्मिन्नेव एतादृशं वात्सल्यं कथम् ? "... । . भारं ... । ... " भो वासव ! पुत्रस्य दैन्यं दृष्ट्वा अहं रोदिमि " इति .... । III. सः , पुत्रेषु , कृच्छ्रेण | Q.16. त्रिदशाधिपः , विनिपातः , अहं , तेन ।
अनुच्छेद - 3 :- Q.NO.12 . I.- दुर्बले , जननी , आत्मवेदनाम् । II.- .... " यदि पुत्रसहस्रं मे सर्वत्र सममेव मे कृपा " इति .... । .... एतस्मिन् पुत्रे .... । .. दुर्बले सुते .. । III. प्रत्यवोचत् , कृपा , सुते | Q.16. - शक्र ! , मे , दीनस्य , अभ्यधिका ।
अनुच्छेद - 4 :- Q.NO.12 . I.- चण्डवातेन , हर्षातिरेकेण , गृहम् । II.- ...." गच्छ वत्से ! सर्वं भद्रं जायेत । " इति .... । .... चण्डवातेन मेघरवैश्च सह .... । .... अपत्येषु ...... । III. समजायत , तुल्यवत्सला , = भद्रं |
Q.16. सर्वेषु , जननी , पुत्रे , भवेत् ।

**********************************************************************************************

अष्टमः पाठः - विचित्रः साक्षी ( Comprehensive Based ) अनुच्छेदः - 1

कश्चन निर्धनो जनः भूरि परिश्रम्य किञ्चिद् वित्तमुपार्जितवान् । तेन वित्तेन स्वपुत्रम् एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः । तत्तनयः तत्रैव छात्रवासे निवसन् अध्ययने संलग्नः समभूत् । एकदा स पिता तनूजस्य रुग्णतामाकर्ण्य व्याकुलो जातः पुत्रं द्रष्टुं च प्रस्थितः । परमर्थकार्श्येन पीडितः स बसयानं विहाय पदातिरेव प्राचलत् ।

I. एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1
- ( क ) निर्धनः जनः भूरि परिश्रम्य किञ्चित् किम् उपार्जितवान् ?
- ( ख ) निर्धनस्य पुरुषस्य पुत्रः छात्रावासे कुत्र संलग्नः अभवत् ?
- ( ग ) सः कस्य रुग्णतामाकर्ण्य व्याकुलो जातः ?

II. पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 × 2 = 2
- ( क ) निर्धनो जनः कुत्र सफलो जातः ?
- ( ख ) किमर्थं निर्धनो जनः पद्भ्याम् गतवान् ?
- ( ग ) कस्य तनयः छात्रावासे वसति ?

III. निर्देशानुसारम् उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 × 2 = 2
- ( क ) " प्राचलत् " इति क्रियापदस्य कर्तृपदम् किम् अस्ति ?
- ( ख ) " पीडितः सः " अत्र विशेषणपदं किम् ?
- ( ग ) " पुत्रस्य " इत्यर्थे अनुच्छेदे किं पर्यायपदं प्रयुक्तम् ?

**********************************************************************************************

अनुच्छेदः - 2

पदातिक्रमेण संचलन् सायं समयेऽप्यसौ गन्तव्याद् दूरे आसीत् । " निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभवाहा ", एवं विचार्य स पार्श्वस्थिते ग्रामे रात्रिनिवासं कर्तुं कञ्चिद् गृहस्थमुपागतः ।
करुणापरो गृही तस्मै आश्रयं प्रायच्छत् । विचित्रा दैवगतिः । तस्यामेव रात्रौ तस्मिन् गृहे कश्चन चौरः गृहाभ्यन्तरं प्रविष्टः । तत्र निहितामेकां मञ्जूषाम् आदाय पलायितः । चौरस्य पादध्वनिना प्रबुद्धोऽतिथिः चौरशङ्कया तमन्वधावत् अगृह्णाच्च , परं विचित्रमघटत । चौरः एव उच्चैः क्रोशितुमारभत " चौरोऽयम्

चौरोऽयम् " इति । तस्य तारस्वरेण प्रबुद्धाः ग्रामवासिनः स्वगृहाद् निष्क्रम्य तत्रागच्छन् वराकमतिथिमेव च चौरं मत्वा ऽभर्त्सयन् । यद्यपि ग्रामस्य आरक्षी एव चौर आसीत् । तत्क्षणमेव रक्षापुरुषः तम् अतिथिं चौरोऽयम् इति प्रख्याप्य कारागृहे प्रक्षिपत् ।

I. एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) ½ × 2 = 1

( क ) का विचित्रा अस्ति ?

( ख ) रात्रिनिवासं कर्तुं निर्धनः कम् उपागतः ?

( ग ) चौरः कुत्र प्रविष्टः ?

II. पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 × 2 = 2

( क ) पदातिक्रमेण संचलन् सायंकाले निर्धनः जनः किम् अचिन्तयत् ?

( ख ) वस्तुतः चौरः कः आसीत् ?

( ग ) ग्रामवासिनः चौरं मत्वा कम् अभर्त्सयन् ?

III. निर्देशानुसारम् उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 × 2 = 2

( क ) " प्रायच्छत् " इति क्रियापदस्य कर्तृपदं किम् ?

( ख ) " निहितामेकां मञ्जूषाम् " अत्र अनयोः पदयोः विशेष्यपदं किम् अस्ति ?

( ग ) " सुप्तः " इत्यस्य विपर्ययपदं गद्यांशात् चित्वा लिखत ?

**************************************************************************************************

Source Based अनुच्छेदः - 3

अग्रिमे दिने स आरक्षी चौर्याभियोगे तं न्यायालयं नीतवान् । न्यायाधीशो बंकिमचन्द्रः उभाभ्यां पृथक् पृथक् विवरणं श्रुतवान् । सर्वं वृत्तमवगत्य स तं निर्दोषम् अमन्यत । आरक्षिणं च दोषभाजनम् । किन्तु प्रमाणाभावात् स निर्णेतुं नाशक्नोत् । ततोऽसौ तौ अग्रिमे दिने उपस्थातुम् आदिष्टवान् । अन्येद्युः तौ न्यायालये स्व - स्व- पक्षं पुनः स्थापितवन्तौ । तदैव कश्चिद् तत्रत्यः कर्मचारी समागत्य न्यवेदयत् यत् इतः क्रोशद्वयान्तराले कश्चिज्जनः केनापि हतः । तस्य मृतशरीरं राजमार्गं निकषा वर्तते । आदिश्यतां किं करणीयमिति । न्यायाधीशः आरक्षिणं अभियुक्तं च तं शवं न्यायालये आनेतुमादिष्टवान् ।

I. एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) ½ × 2 = 1

( क ) आरक्षी चौर्याभियोगे तं कुत्र नीतवान् ?

( ख ) न्यायाधीशः कः आसीत् ?

( ग ) सर्वं वृत्तान्तं अवगत्य न्यायाधीशः कं निर्दोषम् अमन्यत ?

II. पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 × 2 = 2

( क ) न्यायाधीशम् उपेत्य कर्मचारी किम् अवदत् ?

( ख ) न्यायाधीशः मृतशरीरमानेतुम् कौ आदिष्टवान् ?

( ग ) मृतशरीरं कं निकषा वर्तते ?

III. निर्देशानुसारम् उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 × 2 = 2

( क ) " अशक्नोत् " इति क्रियापदस्य कर्तृपदं किम् अस्ति ?

( ख ) " अग्रिमे दिने " इति अनयोः पदयोः विशेषणपदं किम् अस्ति ?

( ग ) " मृतशरीरं " इत्यर्थे अनुच्छेदे किं पदं प्रयुक्तम् अस्ति ?

**************************************************************************************************

अनुच्छेदः - 4

न्यायाधीशेन पुनस्तौ घटनायाः विषये वक्तुमादिष्टौ । आरक्षिणि निजपक्षं प्रस्तुतवति आश्चर्यमघटत् - स शवः प्रावारकमपसार्य न्याधीशमभिवाद्य निवेदितवान् - मान्यवर ! एतेन आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि " त्वया अहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारितः , अतः निजकृत्यस्य फलं भुङ्क्ष्व । अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे " इति । न्यायाधीशः आरक्षिणे कारादण्डमादिश्य तं जनं ससम्मानं मुक्तवान् । अत एवोच्यते -

दुष्कराण्यपि कर्माणि मतिवैभवशालिनः ।
नीतिं युक्तिं समालम्ब्य लीलयैव प्रकुर्वते ॥

I. एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) ½ × 2 = 1

( क ) न्यायाधीशः कस्मै कारादण्डम् आदिष्टवान् ?
( ख ) न्यायाधीशः कः ससम्मानम् मुक्तवान् ?
( ग ) दुष्कराणि अपि कार्याणि के लीलया प्रकुर्वते ?

III. पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 × 2 = 2

( क ) आरक्षी अध्वनि किम् उक्तवान् ?
( ख ) कः प्रावारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान् ?
( ग ) न्यायाधीशः कथम् न्यायम् अकरोत् ?

III. निर्देशानुसारम् उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 × 2 = 2

( क ) " लप्स्यसे " इति क्रियापदस्य कर्तृपदं किम् अस्ति ?
( ख ) " स शवः " अत्र विशेषणपदं किम् अस्ति ?
( ग ) " नमस्कृत्य " इत्यर्थे किं पदम् अनुच्छेदे प्रयुक्तम् ?

*********************************************************************************************

Q.NO.12. गद्यपाठः LESSON - 8 , उत्तराणि :- अष्टमः पाठः - विचित्रः साक्षी ।

अनुच्छेदः - 1

* एकपदेन उत्तरत - धनम् , अध्ययने , तनूजस्य । ** पूर्णवाक्येन उत्तरत - * निर्धनो जनः पुत्रं एकस्मिन् महाविद्यालये प्रवेशं दापयितुं सफलो जातः । ** अर्थकार्श्येन पीडितः सः बसयानं विहाय पदातिरेव प्राचलत् । *** निर्धनस्य तनयः छात्रावासे वसति । *** निर्देशानुसारम् उत्तरत - सः , पीडितः , तनूजस्य ।

अनुच्छेदः - 2

* एकपदेन उत्तरत - दैवगतिः , गृहस्थम् , गृहाभ्यन्तरं । ** पूर्णवाक्येन उत्तरत - * निर्धनः जनः अचिन्तयत् - यत् निशान्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावाहा " इति । ** वस्तुतः आरक्षी एव चौरः आसीत् । *** ग्रामवासिनः चौरं मत्वा वराकमतिथिमेव अभर्त्सयन् । *** निर्देशानुसारम् उत्तरत - गृही , मञ्जूषाम् , प्रबुद्धः ।

अनुच्छेदः - 3.

* एकपदेन उत्तरत - न्यायालयं , बंकिमचन्द्रः , अतिथिम् / निर्धनम् । ** पूर्णवाक्येन उत्तरत - * न्यायाधीशम् उपेत्य कर्मचारी अवदत् यत् इतः क्रोशद्वयान्तराले कश्चिज्जनः केनापि हतः । तस्य मृतशरीरं राजमार्गं निकषा वर्तते । आदिश्यतां किं करणीयमिति । ** न्यायाधीशः मृतशरीरमानेतुम् आरक्षिणं अभियुक्तं च आदिष्टवान् । *** मृतशरीरं राजमार्गं निकषा वर्तते । *** निर्देशानुसारम् उत्तरत - सः , अग्रिमे , शवं ।

अनुच्छेदः - 4

* एकपदेन उत्तरत - आरक्षिणे , निर्धनं जनं , मतिवैभवशालिनः । ** पूर्णवाक्येन उत्तरत - * आरक्षिणा अध्वनि यदुक्तं तद् वर्णयामि " त्वया अहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारितः , अतः निजकृत्यस्य फलं भुङ्क्ष्व । अस्मिन् चौर्याभियोगे त्वं वर्षत्रयस्य कारादण्डं लप्स्यसे " इति । ** शवः प्रावारकमपसार्य न्यायाधीशमभिवाद्य निवेदितवान् ।

*** न्यायाधीशः आरक्षिणे कारादण्डमादिश्यं तं निर्धनं जनं ससम्मानम् मुक्तवान् ।

*** निर्देशानुसारम् उत्तरत - त्वं , स , अभिवाद्य ।

****************************************************************************************************

## Q.NO.13. पठित - पद्यांशः - 5 अङ्काः ( अभ्यासाय पठित - पद्यपाठाः :- 1 , 6 , 9 & 12 )

### प्रथमः पाठः शुचिपर्यावरणम् ।

****************************************************************************************************

1. दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम् । शुचि - पर्यावरणम् ॥
महानगरमध्ये चलदनिशं कालायसचक्रम् ।
मन: शोषयत् तनु: पेषयद् भ्रमति सदा वक्रम् ॥
दुर्दान्तैर्दशनैरमुना स्यान्नैव जनग्रसनम् । शुचि ... ॥

( अनुवाद: :- यहां जीवित रहना कठिन हो गया है । प्रकृति ही शरण है । शुद्ध पर्यावरण ही हमारा आश्रय है । महानगर के मध्य दिन रात लोहे का चक्र ( = प्रदूषण चक्र ) चल रहा है , जो मन को शोषण करते हुए , शरीर को पीसते हुए हमेशा ही टेढ़ीगति से चलता है । इसके कठोर दांतों से लोगों का नाश न हो । ( इस लिए शुद्ध पर्यावरण ही हमारा आश्रय है । )

****************************************************************************************************

( i ) एकपदेन उत्तरत :- ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) अनिशं किं चलति ?

( ख ) अत्र जीवितं कीदृशं जातम् ?

( ग ) कीदृशै: दशनै: जनग्रसनं न भवेत् ?

( ii ) पूर्णवाक्येन उत्तरत :- ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) कुत्र जीवनं दुर्वहमस्ति ?

( ख ) कीदृशं पर्यावरणं शरणम् अस्ति ?

( ग ) कै: जनग्रसनं न भवेत् ?

( iii ) भाषिककार्यम् - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " कालायसचक्रं भ्रमति सदा वक्रम् " अस्मिन् वाक्ये कर्तृपदं किम् ?

( ख ) " दुर्दान्तै: दशनै: अमुना स्यान्नैव जनग्रसनम् " अत्र विशेषणपदं किम् ?

( ग ) " दुर्वहमत्र जीवितं जातं प्रकृतिरेव शरणम् " अत्र " कष्टम् " इति अर्थे किं पदं प्रयुक्तम् ?

****************************************************************************************************

2. कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम् ।
वाष्पयानमाला संधावति वितरन्ती ध्वानम् ॥
यानानां पंक्तयो ह्यनन्ता: कठिनं संसरणम् । शुचि ...॥

( अनुवाद: :- अब धरती पर सैकड़ों मोटा वाहन काजल की तरह काले धुवें को छोड़ रहे हैं । अनेक रेलगाड़ियां चारों ओर फैलाती हुई दौड़ रही हैं । वाहनों की पंक्तियां अनन्त हैं , जिससे चलना कठिन हो गया है । शुद्ध पर्यावरण ही हमारा आश्रय है । )

****************************************************************************************************

( i ) एकपदेन उत्तरत :- ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) शतशकटीयानं कीदृशं धूमं मुञ्चति ?

( ख ) कीदृशी वाष्पयानमाला संधावति ?

( ग ) का संधावति ?

( ii ) पूर्णवाक्येन उत्तरत :- ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

(क) यानानाम् अनन्ता: का: भवन्ति ?

(ख) शतशकटीयानं किं करोति ?

(ग) वाष्पयानमाला कथं सन्धावति ?

(iii) भाषिककार्यम् - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) "कज्जलमलिनं धूमं मुञ्चति शतशकटीयानम्" अस्मिन् वाक्ये कर्तृपदं किम् ?

(ख) "ह्यनन्ता: कठिनं संसरणम्" अत्र विशेषणपदं किम् ?

(ग) "चलति" ति पदस्य विलोमपदं श्लोके किम् अस्ति ?

*******************************************************************************************************************

3. वायुमण्डलं भृशं दूषितं न हि निर्मलं जलम् ।
कुत्सितवस्तुमिश्रितं भक्ष्यं समलं धरातलम् ॥
करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम् । शुचि .... ॥

( अनुवाद: :- वायुमण्डल अत्यन्त प्रदूषित हो गया है । पानी भी स्वच्छ नहीं है । सभी खाने योग्य पदार्थों में ज़हर से भरी पदार्थों की मिलावट हो गई है । एवं सारी पृथ्वी अशुद्ध हो गई है । इन अशुद्धियों को बाहर तथा अन्दर ( मन / बुद्धि ) को अत्यधिक शुद्ध करना चाहिए । इस लिए शुद्ध पर्यावरण ही आश्रय है । )

*******************************************************************************************************************

(i) एकपदेन उत्तरत :- (केवलं प्रश्नद्वयम्) ½ x 2 = 1

(क) किं भृशं दूषितं ?

(ख) बहिरन्तर्जगति किं करणीयम् ?

(ग) धरातलं कीदृशं जातम् ?

(ii) पूर्णवाक्येन उत्तरत :- (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) मानवै: किं करणीयम् ?

(ख) भक्ष्यम् कीदृशं जातम् ?

(ग) वायुमण्डलम् कथं जातम् ?

(iii) भाषिककार्यम् - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) "वायुमण्डलं भृशं दूषितं" अस्मिन् वाक्ये क्रियापदं किम् ?

(ख) "समलं धरातलम्" अत्र विशेषणपदं किम् ?

(ग) "करणीयं बहिरन्तर्जगति तु बहु शुद्धीकरणम्" अत्र "बहि:" इति पदस्य विलोमपदं किमस्ति ?

*******************************************************************************************************************

4. कञ्चित् कालं नय मामस्मान्नगराद् बहुदूरम् ।
प्रपश्यामि ग्रामान्ते निर्झर - नदी - पय: पूरम् ॥
एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम् । शुचि ... ॥

( अनुवाद: :- कुछ समय के लिए मुझे इस प्रदूषित नगर से बहुत दूर ले चलो । जहां गांव के अन्त में पानी से पूरित झरना - नदी को देखूं । निर्जन ( एकान्त ) जंगल में मेरा क्षण भर के लिए भी भ्रमण हो । क्यों कि शुद्ध पर्यावरण ही आश्रय है । )

*******************************************************************************************************************

(i) एकपदेन उत्तरत :- (केवलं प्रश्नद्वयम्) ½ x 2 = 1

(क) "माम् नय" इति क: वदति ?

(ख) कवि: कस्मात् दूरं नेतुं कथयति ?

(ग) कवि: कुत्र पय: पूरं प्रपश्यति ?

(ii) पूर्णवाक्येन उत्तरत :- (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) कवि: ग्रामान्ते किं द्रष्टुमिच्छति ?
(ख) कवि: कुत: गन्तुम् इच्छति ?
(ग) कवि: कान्तारे किं कर्तुमिच्छति ?

(iii) भाषिककार्यम् - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) "प्रपश्यामि ग्रामान्ते निर्झर - नदी - पय: पूरम्" अस्मिन् वाक्ये क्रियापदं किम् ?
(ख) "कश्चित् कालं नय मामस्मान्नगराद् बहुदूरम् " अत्र विशेषणपदं किम् ?
(ग) "एकान्ते कान्तारे क्षणमपि मे स्यात् सञ्चरणम्" अत्र "अरण्ये" इति अर्थे किं पदं प्रयुक्तम् ?

***

5. हरिततरूणां ललितलतानां माला रमणीया ।
कुसुमावलि: समीरचालिता स्यान्मे वरणीया ॥
नवमालिका रसालं मिलिता रुचिरं संगमनम् । शुचि .... ॥

(अनुवाद: :- हरे भरे पेड़ों की, सुन्दर लाताओं की पंक्तियां, फूलों के गुच्छे हवा के द्वारा चलाए/ हिलाए गए , मेरे लिए श्रेष्ठ / लाभकारी हो । सुन्दर रुचिर आम की नई पंक्ति मुझे प्राप्त हो । शुद्ध पर्यावरण ही आश्रय है । )

***

(i) एकपदेन उत्तरत :- (केवलं प्रश्नद्वयम्) ½ x 2 = 1

(क) कीदृशानां तरूणाम् माला रमणीया भवति ?
(ख) का समीरेण चालिता ?
(ग) का रसालं मिलिता ?

(ii) पूर्णवाक्येन उत्तरत :- (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) केषां माला रमणीया ?
(ख) कासां माला रमणीया ?
(ग) नवमालिका कं मिलिता ?

(iii) भाषिककार्यम् - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) "कुसुमावलि: समीरचालिता स्यान्मे वरणीया" अस्मिन् वाक्ये कर्तृपदं किम् ?
(ख) "हरिततरूणां ललितलतानां माला" अत्र "रक्त" इति पदस्य विलोमपदं किम् अस्ति ?
(ग) "नवमालिका रसालं मिलिता रुचिरं संगमनम्" अत्र "आम्रम्" इति अर्थे किं पदं प्रयुक्तम् ?

***

6. अयि चल बन्धो ! खगकुलकलरव - गुञ्जित - वनदेशम् ।
पुर- कलरव सम्भ्रमितजनेभ्यो धृतसुखसन्देशम् ॥
चाकचिक्यजालं नो कुर्याज्जीवितरसहरणम् । शुचि . ॥

(अनुवाद: :- हे बन्धु ! पक्षियों के समूह की आवाज़ से प्रतिध्वनित वन में चलो । नगर / शहर की कोलाहल से परेशान लोगों को धैर्य के सुख का सन्देश दो । नगर की चकाचौंध भरी दुनिया कहीं हमारे जीवन के रस का हरण न कर ले । शुद्ध पर्यावरण ही आश्रय है । )

***

(i) एकपदेन उत्तरत :- (केवलं प्रश्नद्वयम्) ½ x 2 = 1

(क) कवि: कुत्र चलितुम् इच्छति ?
(ख) जना: केन सम्भ्रमिता: ?
(ग) कवि: कीदृशेभ्य: जनेभ्य: दूरं गन्तुं इच्छति ?

(ii) पूर्णवाक्येन उत्तरत :- (केवलं प्रश्नद्वयम्) 1 x 2 = 2

( क ) किं जीवितरसं न हरेत् ?

( ख ) कवि: बन्धुं किं वदति ?

( ग ) कवि: कीदृशं वनदेशं गन्तुम् इच्छति ?

( iii ) भाषिककार्यम् - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " अयि चल बन्धो ! खगकुलकलरव - गुञ्जित - वनदेशम् " अस्मिन् वाक्ये क्रियापदं किम् ?

( ख ) "पुरकलरव सम्भ्रमितजनेभ्यो धृतसुखसन्देशम् " अत्र " दु:ख " इति पदस्य विलोमपदं किम् ?

( ग ) " पुर- कलरव सम्भ्रमितजनेभ्यो धृतसुखसन्देशम् " अत्र " नगर " इति अर्थे किं पदं प्रयुक्तम् ?

*****************************************************************************************************************

7. प्रस्तरतले लतातरुगुल्मा नो भवन्तु पिष्टा: ।
पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टा ॥
मानवाय जीवनं कामये नो जीवन्मरणम् । शुचि ... ॥

( अनुवाद: :- पत्थर के नीचे लता , पेड़ , झाड़ियां पिसे नहीं । प्रकृति में पथरीली / निर्दय सभ्यता सम्मिलित न हो । मैं मनुष्य के लिए जीवन की कामना करता हूं , जीवन के मृत्यु की नहीं । शुद्ध पर्यावरण ही आश्रय है । )

( i ) एकपदेन उत्तरत :- ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) कुत्र लतातरुगुल्मा नो भवन्तु पिष्टा: ?

( ख ) कीदृशी सभ्यता निसर्गे समाविष्टा न स्यात् ?

( ग ) कवि: किं न कामयति ?

( ii ) पूर्णवाक्येन उत्तरत :- ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) कवि: " प्रकृतौ का समाविष्टा न स्यात् " इति चिन्तयति ?

( ख ) कवि: प्रस्तरतले केषां दु:खम् न इच्छति ?

( ग ) कवे: सन्देश: क: अस्ति ?

( iii ) भाषिककार्यम् - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " प्रस्तरतले लतातरुगुल्मा नो भवन्तु पिष्टा: " अस्मिन् वाक्ये कर्तृपदं किम् ?

( ख ) " पाषाणी सभ्यता निसर्गे स्यान्न समाविष्टा " अत्र विशेष्यपदं किम् ?

( ग ) " मानवाय जीवनं कामये नो जीवन्मरणम् " इत्यस्मिन् वाक्ये " जीवनम् " इति पदस्य विलोमपदं किम् अस्ति ?

*****************************************************************************************************************

उत्तराणि :- Q.NO. 13. ( पाठः - 1. )

श्लोकः - 1. I. कालायसचक्रम् , दुर्वहम् , दुर्दान्तैः | II. अत्र महानगरमध्ये ...... | शुचि ..... | दुर्दान्तैर्दशनैरमुना .... | III. कालायसचक्रं , दुर्दान्तै: , दुर्वहम् |

श्लोकः - 2. I. कज्जलमलिनं , वितरन्ती , बाष्पयानमाला | II. ... पंक्तय: ... । .... कज्जलमलिनं धूमं मुञ्चति । .... ध्वानं वितरन्ती ..... । III. शतशकटीयानम् , कठिनम् , संधावति |

श्लोकः - 3. I. वायुमण्डलम् , शुद्धीकरणम् , समलम् । II. ..... बहिरन्तर्जगति तु बहु शुद्धीकरणम् ....... । ...... कुत्सितवस्तुमिश्रितम् ....... । ....... भृशं दूषितम् ....... | III. दूषितं , समलम् , अन्त: ।

श्लोकः - 4. I. कवि: , नगरात् , ग्रामान्ते । II. ..... निर्झर - नदी - पय:पूरम् । ....... नगरात् । ..... क्षणमपि सञ्चरणम् । III. प्रपश्यामि , अस्मात् , कान्तारे ।

श्लोकः - 5. I. . हरितानां , कुसुमावलि: , नावमालिका । II. .... हरिततरूणां ..... । ...... ललितलतानां ..... । ...... रसालं ...... । III. कुसुमावलि: , हरित , रसालं ।

श्लोकः - 6. I. वनदेशं , पुरकलरवेण , सम्भ्रमितेभ्य: । II. चाकचिक्यजालं .... । ..... " अयि बन्धो ! खगकुल - कलरव – गुञ्जित - वनदेशम् चल " इति ..... । ..... खगकुलकलरव - गुञ्जितं ..... । III. चल , सुख , पुर ।

**********************************************************************************************************************************

श्लोकः - 7. I. प्रस्तरतले , पाषाणी , जीवन्मरणम् । II. ..... पाषाणी सभ्यता ... । ..... लतातरुगुल्मानां .... । ...... " शुचि - पर्यावरणम् एव शरणम् " इति कवे: ..... । III. लतातरुगुल्मा: , सभ्यता , मरणम् ।

**********************************************************************************************************************************

## षष्ठ: पाठ: । सुभाषितानि ।

**********************************************************************************************************************************

सूचना :- इस पाठ के 10 श्लोकों का अनुवाद , CBSE प्रश्नपत्र 23 - 24 के अनुसार :- Q.NO. 5 , Q.NO सन्धि , 6 Q.NO. समास , Q.NO. 13. 2. Source based & 2. Case based , Q.NO. 15 प्रश्ननिर्माण , Q.NO. 16 अन्वय , तथा Q.NO. 18 शुद्धार्थ - चयनम् अभ्यास के लिए ( उत्तरसहित ) दिया गया है |

**********************************************************************************************************************************

Q.NO.13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5

1. आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपु: ।
नास्त्युद्यमसमो बन्धु: कृत्वा यं नावसीदति ॥

( अनुवादः :- ( निश्चय ही ) आलस्य ही मनुष्यों के शरीर में रहने वाला सब से बड़ा शत्रु है । परिश्रम के समान उसका कोई मित्र नहीं है जिसको करके ( मनुष्य ) दुःखी नहीं होता है । )

( i ) एकपदेन उत्तरत :- ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) आलस्यं हि केषां शारीरस्थो महान् रिपु: अस्ति ?
( ख ) मनुष्याणां शारीरस्थो आलस्यं नाम कीदृश: रिपु: अस्ति ?
( ग ) केन सम: बन्धु: न अस्ति ?

( ii ) पूर्णवाक्येन उत्तरत :- ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) जन: किं कृत्वा न अवसीदति ?
( ख ) मनुष्याणां शरीरे क: रिपु: तिष्ठति ?
( ग ) आलस्यं कुत्र तिष्ठति

( iii ) भाषिककार्यम् - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " नास्त्युद्यमसमो बन्धु: " अत्र कर्तृपदं किम् ?
( ख ) " महान् रिपु: " अत्र विशेषणपदं किम् ?
( ग ) " दु:खी भवति " इति अर्थे श्लोके पर्यायपदं किम् अस्ति ?

**************************************************************************************************

Q.NO.16. मञ्जूषायाः सहायतया अधोलिखितश्लोकस्य अन्वयं पूरयत - 1 x 4 = 4

मञ्जूषा :- आलस्यं , बन्धु: , महान् , कृत्वा ।

अन्वय: :- मनुष्याणां हि शारीरस्थ: ................ रिपु: ............... ( अस्ति ) । उद्यमसम: ............. न अस्ति यं .............. ( मनुष्य: ) न अवसीदति ।

**************************************************************************************************

उत्तराणि :- Q.NO.13. ( i ) मनुष्याणाम् , महान् , उद्यमेन । ( ii ) ... उद्यमम् ... । ... आलस्यं नाम महान् ... । ... शरीरे .... । ( iii ) बन्धुः , महान् , = अवसीदति | Q.NO.16. महान् , आलस्यं , बन्धु: , कृत्वा ।

**********************************************************************************************************************************

2. गुणी गुणं वेत्ति न वेत्ति निर्गुणो ,
बली बलं वेत्ति न वेत्ति निर्बल: ।
पिको वसन्तस्य गुणं न वायस:

करी च सिंहस्य बलं न मूषकः ॥

( अनुवादः :- गुणवान व्यक्ति गुण ( के महत्त्व ) को जानता है । गुणहीन व्यक्ति ( गुण को ) नहीं जानता है । बलवान व्यक्ति बल ( के महत्त्व ) को जानता है । बलहीन ( निर्बल व्यक्ति बल को ) नहीं जानता है । कोयल वसन्तऋतु के ( महत्त्व ) गुण को जानती है । कौआ ( वसन्त के महत्त्व को ) नहीं जानता है । और हाथी सिंह के बल जानता है । चूहा ( सिंह के बल को ) नहीं जानता है । )

Q.NO.13. ( i ) एकपदेन उत्तरत :- ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) निर्गुणः कं न वेत्ति ?

( ख ) पिको कस्य गुणं वेत्ति ?

( ग ) सिंहस्य बलं कः वेत्ति ?

( ii ) पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) कः गुणं वेत्ति ?

( ख ) कः सिंहस्य बलं न वेत्ति ?

( ग ) निर्बलः किं न वेत्ति ?

( iii ) भाषिककार्यम् - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " वेत्ति " इति क्रियापदस्य कर्तृपदं किम् ?

( ख ) " गुणी " इति पदस्य विलोमपदं किम् ?

( ग ) " गजः " इति पदस्य समानार्थकपदं श्लोके किम् अस्ति ?

*******************************************************************************************************

Q.NO.16. मञ्जूषायाः सहायतया अधोलिखितश्लोकस्य अन्वयं पूरयत - 1 x 4 = 4

मञ्जूषा :- बली , वसन्तस्य , मूषकः , गुणं ।

अन्वयः :- गुणी ............. वेत्ति , निर्गुणः ( गुणं ) न वेत्ति , ............. बलं वेत्ति , निर्बलः ( बलं ) न वेत्ति , पिकः ..................... गुणं वेत्ति , वायसः ( वसन्तस्य गुणं ) न ( वेत्ति ) , करी सिंहस्य बलं ( वेत्ति ) , ................ ( सिंहस्य बलं ) न ( वेत्ति ) ।

*******************************************************************************************************

उताराणि :- Q.13. ( i ) - गुणं , वासन्तस्य , करी । ( ii ) - गुणी ... । मूषकः ... । ... बलं .... ।
( iii ) गुणी / निर्गुणः / बली ... , x निर्गुणः , = करी | Q.16. - गुणं , बली , वसन्तस्य , मूषकः ।

*******************************************************************************************************

Q.NO.13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5

3. निमित्तमुद्दिश्य हि यः प्रकुप्यति
ध्रुवं स तस्यापगमे प्रसीदति ।
अकारणद्वेषि मनस्तु यस्य वै
कथं जनस्तं परितोषयिष्यति ॥

(अनुवादः :- निश्चय ही जो व्यक्ति किसी कारण के उद्देश्य से ही क्रोध करता है , (व्यक्ति) उस कारण के समाप्त होने ( मिट जाने ) पर प्रसन्न भी हो जाता है । लेकिन जिस व्यक्ति का मन बिना किसी कारण के ( किसी से ) द्वेष करता है , व्यक्ति उसे ( बिना कारण द्वेष करने वाले को ) कैसे सन्तुष्ट करेगा ? )

( i ) एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) अत्र किम् अकारणद्वेषि उक्तम् ?

( ख ) किम् उद्दिश्य जनः प्रकुप्यते ?

( ग ) कस्य अपगमे मनुष्यः प्रसीदति ?

केन्द्रीय विद्यालय संगठन

( ii ) पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) मनुष्य: कदा ध्रुवं प्रसीदति ?

( ख ) कं जन: कथमपि न परितोषयिष्यति ?

( ग ) यः जनः प्रकुप्यति सः कदा प्रसीदति ?

( iii ) निर्देशानुसारम् उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) ' य: ' इति कर्तृपदस्य क्रियापदं किम् ?

( ख ) ' अकारणद्वेषि मनः ' अनयो: पदयो: किं विशेष्यपदम् ?

( ग ) ' मनुष्य: ' इत्यस्य पदस्य क: पर्याय: श्लोके प्रयुक्त: ?

*****************************************************************************************************

Q.NO.16. मञ्जूषायाः सहायतया अधोलिखितश्लोकस्य अन्वयं पूरयत - 1 x 4 = 4

मञ्जूषा :- अपगमे , जन: , उद्दिश्य , अकारणद्वेषि ।

अन्वय: :- य: ( नर: ) निमित्तम् ......... हि प्रकुप्यति स: तस्य .......... ध्रुवं प्रसीदति । यस्य मन: तु .......... वै ( अस्ति ) तं ........ कथं परितोषयिष्यति ?

*****************************************************************************************************

उत्तराणि :- Q.13. ( i ). मन: , निमित्तम् , तस्य / क्रोधस्य / निमित्तस्य | ( ii ). मनुष्य: निमित्तस्य अपगमे ध्रुवं प्रसीदति | यस्य मनस्तु अकारणद्वेषि भवति , तं जन: कथमपि न परितोषयिष्यति | यः जनः प्रकुप्यति , सः तस्य / क्रोधस्य अपगमे प्रसीदति | ( iii ). प्रकुप्यति , मन: , जन: | Q.16. उद्दिश्य , अपगमे , अकारणद्वेषि , जन: |

*****************************************************************************************************

4. उदीरितोऽर्थ: पशुनापि गृह्यते
हयाश्च नागाश्च वहन्ति बोधिता: ।
अनुक्तमप्यूहति पण्डितो जन:
परेङ्गितज्ञानफला हि बुद्धय: ॥

( अनुवादः :- कहा गया अर्थ पशु के द्वारा भी प्राप्त किया जाता है । प्रेरित किए गए घोड़े तथा हाथी भी ( भार ) वहन करते हैं । विद्वान व्यक्ति बिना कही गई बात ( अर्थ ) का भी अंदाजा लगाता है । बुद्धियां दूसरे लोगों के संकेत से उत्पन्न ज्ञान रूपी फल वाली होती हैं । )

( i ) एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) कीदृशा: हया: नागा: च वहन्ति ?

( ख ) अनुक्तम् अपि क: ऊहति ?

( ग ) परेङ्गितज्ञानफलाः का: भवन्ति ?

( ii ) पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) कीदृश्य: बुद्धय: भवन्ति ?

( ख ) पशुनापि क: गृह्यते ?

( ग ) बोधिता: के के भारं वहन्ति ?

( iii ) निर्देशानुसारम् उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " हयाश्च नागाश्च वहन्ति " अत्र क्रियापदं किम् ?

( ख ) " उदीरित: अर्थ: " अत्र विशेषणपदं किम् ?

( ग ) " उक्तम् " इति पदस्य विलोमपदं श्लोके किम् प्रयुक्तम् ?

*****************************************************************************************************

Q.NO.16. मञ्जूषा :- बुद्धय: , उदीरित: , नागा: , अनुक्तम् ।

अन्वय: :- पशुना अपि .......... अर्थ: गृह्यते , हया: ........... च बोधिता: ( भारं ) वहन्ति ,
पण्डित: जन: .......... अपि ऊहति , ........... परेङ्गितज्ञानफला: हि ( भवन्ति ) |

**********************************************************************************************

उत्तराणि :- Q.13. ( i ) बोधिता: , पण्डित: , बुद्धय: । ( ii ) - परेङ्गितज्ञानफलाः ... । ... उदीरित: अर्थ: ... । ... हया: नागा: च .... । ( iii ) वहन्ति , उदीरितः , अनुक्तम् | Q.16. उदीरित: , नागा: , अनुक्तम् , बुद्धय: ।

**********************************************************************************************

5. क्रोधो हि शत्रु: प्रथमो नराणां
देहस्थितो देहविनाशनाय ।
यथास्थित: काष्ठगतो हि वह्नि:
स एव वह्निर्दहते शरीरम् ॥

( अनुवादः :- कोध ही मनुष्यों का पहला शत्रु है । देह में स्थित शरीर के नाश के लिए जैसे लकड़ी में समाई हुई अग्नि है। वह अग्नि ही ( लकड़ी को ही जला डालती है , उसी प्रकार क्रोध ) शरीर को जला डालती है ।

( i ) एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) क्रोध: केषां शत्रु: अस्ति ?

( ख ) देहविनाशनाय क: देहस्थित: भवति ?

( ग ) काष्ठगत: क: काष्ठं दहते ?

( ii ) पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) कुत्र स्थित: क्रोधरूप: वह्नि: शरीरं दहते ?

( ख ) मनवानां प्रथम: शत्रु: क: भवति ?

( ग ) काष्ठगत: वह्नि: किं करोति ?

( iii ) निर्देशानुसारम् उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " स एव वह्नि: दहते शरीरम् " अत्र कर्तृपदं किम् ?

( ख ) " देहस्थित: क्रोध: " अत्र विशेषणपदं किम् ?

( ग ) " मित्रम् " इति पदस्य विलोमपदं श्लोके किम् अस्ति ?

**********************************************************************************************

Q.NO.16. मञ्जूषा :- प्रथमः , नराणां , वह्निः , शरीरम् ।

अन्वय: :- ............ देहविनाशनाय हि ............ शत्रु: देहस्थित: क्रोध: ( भवति ) यथा काष्ठगत: स्थित: हि ........... ( काष्ठम् एव दहते ) ( तथैव देहस्थित: ) सः ( क्रोध: ) एव वह्नि: .......... दहते ।

**********************************************************************************************

उत्तराणि :- Q.13. ( i ) नाराणाम् , क्रोध: , वह्नि: । ( ii ) - शरीरे ... । ... क्रोध: ... । ... काष्ठं दहते । ( iii ) वह्निः , देहस्थितः , शत्रुः | Q.16. - , नराणां , प्रथम: , वह्नि: , शरीरम् ।

**********************************************************************************************

6. मृगा मृगै: सङ्गमनुव्रजन्ति ,
गावश्च गोभि: तुरगास्तुरङ्गै: ।
मूर्खाश्च मूर्खैः सुधिय: सुधीभि: ,
समान - शील - व्यसनेषु सख्यम् ॥

( अनुवादः :- हिरण , हिरणों के साथ पीछे पीछे चलते ( संग का अनुसरण करते ) हैं गाय गायों के साथ , घोड़े घोड़ों के साथ मूर्ख मूर्खों के साथ , बुद्धिमान बुद्धिमानों के साथ जाते ( संग का अनुसरण करते ) हैं । समान आचार / व्यवहार एवं स्वभाव वालों में परस्पर मित्रता होती है । )

( i ) एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) मृगा कैः सह सङ्गम् अनुव्रजन्ति ?

( ख ) के मूर्खैः सह अनुव्रजन्ति ?

( ग ) किं सुधियः मूर्खैः सह अनुव्रजन्ति ?

( ii ) पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) सख्यं केषु भवति ?

( ख ) के तुरङ्गैः सङ्गमनुव्रजन्ति ?

( ग ) गावः किम् कुर्वन्ति ?

( iii ) निर्देशानुसारम् उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " मृगा मृगैः सङ्गम् अनुव्रजन्ति " अत्र कर्तृपदं किम् ?

( ख ) " सङ्गतिं " इति पदस्य समानार्थकपदं किम् ?

( ग ) " शत्रुता " इति पदस्य विलोमपदं श्लोके किम् अस्ति ?

*****************************************************************************************************

Q.NO.16. मञ्जूषा :- सङ्गम् , समान , गावः , तुरङ्गैः ।

अन्वयः :- मृगाः मृगैः ( सह ) , .......... च गोभिः ( सह ) , तुरगाः .......... ( सह ) , मूर्खाः च मूर्खैः ( सह ) , सुधियः सुधीभिः ( सह ) ......... अनुव्रजन्ति , सख्यम् .......... - शील - व्यसनेषु ( भवति ) ।

*****************************************************************************************************

उत्तराणि :- Q.13. ( i ) मृगैः , मूर्खाः , न । ( ii ) ... स्मान - शील - व्यसनेषु ... । तुरगाः ... । ... गोभिः सङ्गमनुव्रजन्ति । ( iii ) मृगाः , सङ्गम् , सख्याम् | Q.16. गावः , तुरङ्गैः , सङ्गम् , समान ।

*****************************************************************************************************

7. सेवितव्यो महावृक्षः फलच्छायासमन्वितः ।
यदि दैवात् फलं नास्ति छाया केन निवार्यते ॥

( अनुवादः :- फल एवं छाया से युक्त महान वृक्ष का सेवन करना ( आश्रय लेना ) चाहिए । यदि भाग्य से फल नहीं है तो छाया को कौन रोक सकता है )

( i ) एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) कीदृशः महावृक्षः सेवितव्यः ?

( ख ) कस्मात् फलं नास्ति ?

( ग ) कस्य छाया न निवार्यते ?

( ii ) पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) यदि दैवात् फलं नास्ति तर्हि किं छाया केनापि निवार्यते ?

( ख ) कैः समन्वितः महावृक्षः सेवितव्यः ?

( ग ) अस्माभिः कः कर्तव्यः ?

( iii ) निर्देशानुसारम् उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " यदि दैवात् फलं नास्ति " अत्र कर्तृपदं किम् ?
( ख ) " महावृक्षः फलच्छायासमन्वितः " अत्र विशेष्यपदं किम् ?
( ग ) " भाग्यात् " इति पदस्य पर्यायपदं श्लोके किम् अस्ति ?

*****************************************************************************************

Q.NO.16. मञ्जूषा :- दैवात् , नास्ति , केन , महावृक्षः ।

अन्वयः :- फलच्छायासमन्वितः ............. सेवितव्यः। ............... यदि फलं ................ ( वृक्षस्य ) छाया ..................... निवार्यते ?

*****************************************************************************************

उत्तराणि :- Q.13. ( i ) फलच्छायासमन्वितः , दैवात् , महावृक्षस्य । ( ii ) ... न ... । फलैः छायया च ...। ... फलच्छायासमन्वितः महावृक्षः सेवितव्यो । Q.16. महावृक्षः , दैवात् , नास्ति , केन ।

*****************************************************************************************

8. अमन्त्रमक्षरं नास्ति , नास्ति मूलमनौषधम् ।
अयोग्यः पुरुषः नास्ति योजकस्तत्र दुर्लभः ॥

( अनुवादः :- मन्त्र ( विचार ) से हीन कोई अक्षर / ज्ञान नहीं है , औषधि से रहित कोई जड़ नहीं है , योग्यता से हीन कोई पुरुष नहीं है वहां (व्यक्तियों एवं वस्तुओं ) से जोड़ने वाला ( व्यक्ति ) दुर्लभ ( मिलना मुश्किल ) है । )

( i ) एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) अमन्त्रं किं नास्ति ?
( ख ) कीदृशं मूलं नास्ति ?
( ग ) कीदृशः पुरुषः नास्ति ?

( ii ) पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) लोके कः दुर्लभः भवति ?
( ख ) अनौषधं किं न भवति ?
( ग ) योजकः कुत्र दुर्लभः ?

( iii ) निर्देशानुसारम् उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " अयोग्यः पुरुषः नास्ति " अत्र क्रियापदं किम् ?
( ख ) " मूलम् अनौषधम् " अत्र अनयोः पदयोः विशेषणपदं किम् ?
( ग ) " सुलभः " इत्यस्य पदस्य विलोमपदं श्लोके किम् अस्ति ?

*****************************************************************************************

Q.NO.16. मञ्जूषा :- अमन्त्रम् , अस्ति , दुर्लभः , अनौषधम् ।

अन्वयः :- ............ अक्षरं न अस्ति , ............. मूलं न अस्ति , अयोग्यः पुरुषः न ............... , योजकः तत्र ( लोके ) ................ ।

*****************************************************************************************

उत्तराणि :- Q.13. ( i ) अक्षरम् , अनौषधम् , अयोग्यः । ( ii ) - ... योजकः ... । ... मूलाम ... । ... लोके .... । ( iii ) ( न ) अस्ति , अनौषधं , दुर्लभः | Q.16. - अमन्त्रम् , अस्ति , दुर्लभः , अनौषधम् ।

*****************************************************************************************

9. संपत्तौ च विपत्तौ च महतामेकरूपता ।
उदये सविता रक्तो रक्तश्चास्तमये तथा ॥

( अनुवादः :- धनवान होने पर और धनहीन होने पर महान लोग समान रहते हैं । जैसे सूर्य उदय होते हुए लाल एवं अस्त होते हुए भी लाल रंग का ही होता है। )

( i ) एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) संपत्तौ च विपत्तौ च केषाम् एकरूपता भवति ?

( ख ) संपत्तौ च विपत्तौ च महतां का भवति ?

( ग ) उदये क: रक्त: भवति ?

( ii ) पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) महतां प्रकृति: कदा एकरूपता भवति ?

( ख ) सविता कदा रक्तो भवति ?

( ग ) अस्तमये सविता कीदृश: भवति ?

( iii ) निर्देशानुसारम् उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " सविता रक्तो ( भवति ) " अत्र कर्तृपदं किम् ?

( ख ) " सविता रक्त: " अत्र विशेषणपदं किम् ?

( ग ) " सूर्यः " इति अर्थ श्लोके पर्यायपदं किम् अस्ति ?

***************************************************************************************************

Q.NO.16. मञ्जूषा :- एकरूपता , रक्त : , उदये , विपत्तौ ।

अन्वय: :- महतां संपत्तौ च ............... च ................ ( भवति ) । ( यथा ) सविता ............... रक्त: ( भवति ) तथा अस्तमये च ............. ( भवति ) ।

***************************************************************************************************

उत्तराणि :- Q.13. ( i ) महताम् , एकरूपता , सविता । ( ii ) ... संपत्तौ विपत्तौ च ... । ... उदये / अस्तमये ... । ... रक्त: .... । ( iii ) सविता , रक्तः , सविता | Q.16. विपत्तौ , एकरूपता , उदये , रक्त : ।

***************************************************************************************************

Q.NO.13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5

10. विचित्रे खलु संसारे नास्ति किञ्चिन्निरर्थकम् ।
अश्वश्चेद् धावने वीर: भारस्य वहने खर: ॥

( अनुवादः :- इस विचित्र संसार में कुछ भी निरर्थक नहीं है । यदि घोडा दौड़ने में वीर है तो गधा भार ढोने में ( वीर है ) ।

( i ) एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) धावने क: वीर: ?

( ख ) संसार: कीदृश: अस्ति ?

( ग ) कुत्र किञ्चित् निरर्थकं न अस्ति ?

( ii ) पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) अश्व: कस्मिन् वीर: अस्ति ?

( ख ) क: विचित्र: अस्ति ?

( ग ) भारवहने क: वीर: अस्ति ?

( iii ) निर्देशानुसारम् उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) 'सार्थकं' अस्य पदस्य क: विपर्यय: श्लोके प्रयुक्त: ?

( ख ) 'विचित्रे खलु संसारे नास्ति' अस्मिन् वाक्ये क्रियापदं किम् ?

( ग ) 'संसारे' इति विशेष्यपदस्य विशेषणपदं श्लोके किम् अस्ति ?

***************************************************************************************************

Q.NO.16. मञ्जूषा :- धावने , खर: , न्निरर्थकम् , खलु ।

अन्वय: :- विचित्रे संसारे ............... किञ्चित् ............... न अस्ति । अश्व: चेत् ............. वीर: ( तर्हि ) भारस्य वहने .......... ( वीर: ) अस्ति ।

*********************************************************************************************

उत्तराणि :- Q.13.( i ) अश्व: विचित्र: , संसारे | ( ii ) अश्व: धावने वीर: अस्ति | संसार: विचित्र: अस्ति | भारवहने खर: वीर: अस्ति | ( iii ) निरर्थकं , नास्ति , विचित्रे | Q.16. खलु , न्निरर्थकम् , धावने , खर: ।

*********************************************************************************************

# नवम: पाठ: - " सूक्तय: "

ग्रन्थपरिचयः :- अयं पाठः मूलतः तमिलभाषायाः " तिरुक्कुरल् " नामकग्रन्थात् गृहीतः अस्ति । अयं ग्रन्थः तमिलभाषायाः वेदः इति कथ्यते ।

कविपरिचयः :- अस्य प्रणेता भवति श्रीमान् तिरुवल्लुवर् महोदयः । अयं तमिलभाषायाः प्रसिद्धकविः इति अङ्गीक्रियते ।

*********************************************************************************************

Q.NO.13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5

1. पिता यच्छति पुत्राय बाल्ये विद्याधनं महत् ।
पिताऽस्य किं तपस्तेपे इत्युक्तिस्तत्कृतज्ञता ॥

( अनुवादः :- पिता पुत्र को बचपन में महान विद्या रूपी धन देता है । इसके लिए पिता ने क्या तप किया यह कथन उस की कृतज्ञता है । )

I. एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) क: विद्याधनं यच्छति ?

( ख ) पिता पुत्राय बाल्ये कीदृशं विद्याधनं यच्छति ?

( ग ) पिता पुत्राय कदा महत् विद्याधनं यच्छति ?

II. पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " पिताऽस्य किं तपस्तेपे " इति उक्ति: किम् अस्ति ?

( ख ) पिता पुत्राय किम् करोति ?

( ग ) पुत्र: बाल्ये किं प्राप्नोति ?

III. निर्देशानुसारम् उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " पिता यच्छति पुत्राय " अत्र कर्तृपदं किम् ?

( ख ) " विद्याधनं महत् " इत्यनयोः पदयोः विशेषणपदं किम् ?

( ग ) " शैशवे " इति पदस्य पर्यायपदं श्लोके किम् अस्ति ?

*********************************************************************************************

उत्तराणि :- श्लोक: - 1. I. पिता , महत् , बाल्ये । II. .. कृतज्ञता ... । .. बाल्ये महत् विद्याधनं ददाति । .. महत् विद्याधनं ... । III. पिता , महत् , = बाल्ये ।

*********************************************************************************************

2. अवक्रता यथा चित्ते तथा वाचि भवेद् यदि ।
तदेवाहु: महात्मान: समत्वमिति तथ्यत: ॥

( अनुवादः :- जैसा सीधापन मन में है वैसा यदि वाणी में हो जाये , महापुरुषों ने मूलरूप से उसे समत्व ही कहा है ।

I. एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) चित्ते का भवेत् ?

( ख ) यथा अवक्रता चित्ते भवति तथा कस्यां अवक्रता भवेत् ?

( ग ) के चित्ते वाचि च अवक्रता एव समत्वम् इति आहु: ?

II. पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

(क) महात्मान: अवक्रता कुत्र भवेत् इति अवदन् ?

(ख) महात्मान: कथं तदेव समत्वम् इति आहु: ?

(ग) समत्वं किं कथ्यते ?

III. निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) "अवक्रता यथा चित्ते तथा वाचि भवेद् यदि" अत्र कर्तृपदं किम् ?

(ख) "तत् समत्त्वम्" इत्यनयोः पदयोः विशेषणपदं किम् ?

(ग) "वचने" इति अर्थे श्लोके पर्यायपदं किम् प्रयुक्तम् ?

***************************************************************************************************

उत्तराणि :- श्लोक: - 2. I. अवक्रता , वाचि , महात्मान: । II. ... चित्ते वाचि च ... । ... यथा अवक्रता चित्ते तथा च वाचि भवेद् यदि तदेव .... । ... यदि अवक्रता चित्ते वाचि च भवेत् ... । III. अवक्रता , समत्त्वम् , = वाचि ।

***************************************************************************************************

3. त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत् ।
परित्यज्य फलं पक्वं भुङ्क्तेऽपक्वं विमूढधी: ॥

(अनुवादः :- जो धर्म युक्त वाणी को छोडकर के कठोर वाणी बोलता है । (वह) मूर्खबुद्धि वाला पके हुए फल को छोडकरके कच्चे फल को खाता है। )

I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ½ x 2 = 1

(क) विमूढधी: कां त्यजति ?

(ख) क: पक्वं फलं परित्यजति ?

(ग) विमूढधीः कीदृशीं वाचं त्यजति ?

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) विमूढधी: कां त्यजति ?

(ख) क: पक्वं फलं परित्यजति ?

(ग) विमूढ्धी: कीदृशीं वाचं त्यजति ?

III. निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) " विमूढधी: अपक्वं भुङ्क्ते " अत्र कर्तृपदं किम् ?

(ख) "धर्मप्रदां वाचं" अत्र विशेषणपदं किम् ?

(ग) " बुद्धिमान्" इति पदस्य विलोमपदं श्लोके किम् अस्ति ?

***************************************************************************************************

उत्तराणि :- श्लोक: - 3. I. वाचं , विमूढधी: , धर्मप्रदां , II. ... धर्मप्रदां वाचं ... । ... य: धर्मप्रदां वाचं त्यक्त्वा परुषां वाचं वदति स: ... । III. विमूढधीः , धर्मप्रदां , विमूढधी: ।

***************************************************************************************************

4. विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्त: प्रकीर्तिता: ।
अन्येषां वदने ये तु ते चक्षुर्नामिनी मते ॥

(अनुवादः :- (जनों के द्वारा) इस संसार में विद्वान ही नेत्रों वाले कहे गए हैं । दूसरों के मुख में तो जो (दो नेत्र) है, वे (दोनों नेत्र) नेत्र नाम से जाने जाते हैं ।

I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ½ x 2 = 1

1. अस्मिन् लोके के चक्षुष्मन्त: प्रकीर्तिता: ?

2. कुत्र विद्वांसः एव चक्षुष्मन्त: प्रकीर्तिता: ?

3. केषां वदने ये तु ते चक्षुर्नामिनी मते ?

II. पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

1. के चक्षुष्मन्त: कथिता: ?

2. कुत्र द्वे नेत्रे चक्षुर्नामिनी मते ?

3. नाममात्रम् एव चक्षुषी कुत्र स्त: ?

III. निर्देशानुसारम् उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

1. " जनाः ' विदुषः चक्षुष्मतः ' इति वदन्ति " अत्र कर्तृपदं किम् ?

2. " विद्वांस: चक्षुष्मन्त: " अत्र विशेषणपदं किम् ?

3. " मुखे " = ........ पर्यायपदं किम् ?

**************************************************************************************

उत्तराणि :- श्लोक: - 4. I.विद्वांस: , अस्मिन् लोके , अन्येषां । II. विद्वांस: एव ... । अन्येषां वदने ये द्वे नेत्रे स्त: ते ... । अन्येषां वदने । III. जनाः , चक्षुष्मन्त: , = वदने ।

****************************************************************************************************************

5. यत् प्रोक्तं येन केनापि तस्य तत्त्वार्थनिर्णय: ।
कर्त्तुं शक्यो भवेद्येन स विवेक इतीरित: ॥

( अनुवादः :- जिस किसी के द्वारा जो कहा गया है उसके तत्त्व के अर्थ निर्णय करने के लिए जो समर्थ है उसी को विवेक कहा गया है । )

I. एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) केन यत् प्रोक्तम् ?

( ख ) येन केनापि प्रोक्तस्य क: कर्तुं शक्य: भवेत् ?

( ग ) येन केनापि किं प्रोक्तम् ?

II. पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) कस्य तत्त्वार्थनिर्णय: कर्तुं शक्य: ?

( ख ) क: विवेक: इति ईरित: ?

( ग ) विवेकी कस्य निर्णयं कर्तुं समर्थ: ?

III. निर्देशानुसारम् उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " सः विवेकः इति ईरित: " अत्र क्रियापदं किम् ?

( ख ) " यत् प्रोक्तं " अत्र अनयोः पदयोः विशेष्यपदं किम् ?

( ग ) " अविवेकः " इति पदस्य श्लोके विलोमपदं किम् ?

****************************************************************************************

उत्तराणि :- श्लोक: - 5. I. येन केनापि , तत्त्वार्थनिर्णय: , यत् प्रोक्तम् । II. येन केनापि प्रोक्तस्य ... । येन केनापि प्रोक्तस्य येन तत्त्वार्थनिर्णय: कर्त्तुं शक्य: भवेत् ... । III. ईरितः , प्रोक्तं , X विवेकः ।

*****************************************************************************************************************

6. वाक्पटुर्धैर्यवान् मन्त्री सभायामप्यकातर: ।
स केनापि प्रकारेण परैर्न परिभूयते ॥

( अनुवादः :- ( जो ) मन्त्री वाणी में कुशल , धैर्यवान , सभा में निडर होता है , वह किसी के द्वारा भी किसी प्रकार से अपमानित नहीं होता । )

I. एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

(क) कीदृश: मन्त्री सभायामप्यकातर: भवति ?

(ख) वाक्पटुर्धैर्यवान् मन्त्री कुत्र अकातर: भवति ?

(ग) वाक्पटु: मन्त्री केनापि प्रकारेण कै: न परिभूयते ?

II. पूर्णवाक्येन उत्तर्त - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) क: केनापि प्रकारेण परैर्न परिभूयते ?

(ख) वाक्पटुर्धैर्यवान् मन्त्री सभायां कीदृश: भवेत् ?

(ग) मन्त्री कथं परै: न परिभूयते ?

III. निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) "स: केनापि प्रकारेण परै: न परिभूयते" अत्र क्रियापदं किम् ?

(ख) "धैर्यवान् मन्त्री" इत्यनयो: पदयो: विशेष्यपदं किम् ?

(ग) "अकातर:" इति पदस्य पर्यायपदं श्लोके किम् अस्ति ?

****************************************************************************************

उत्तराणि :- श्लोक: - 6. I. धैर्यवान् , सभायां , परै: । II. वाक्पटुर्धैर्यवान् मन्त्री ... । ... अकातर: ... । ... केनापि प्रकारेण ... । III. परिभूयते , मन्त्री , धैर्यवान् ।

****************************************************************************************

7. य इच्छत्यात्मन: श्रेय: प्रभूतानि सुखानि च ।
न कुर्यादहितं कर्म स परेभ्य: कदापि च ॥

(अनुवाद: :- जो अपना कल्याण / भला और अत्यधिक सुख चाहता है वह कभी भी दूसरों के साथ बुरा / अहित काम न करें ।)

I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ½ x 2 = 1

(क) जन: कस्य श्रेय: इच्छति ?

(ख) जन: कीदृशानि सुखानि इच्छति ?

(ग) जन: कीदृशं कर्म न कुर्यात् ?

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) आत्मैषी जन: किं किं इच्छति ?

(ख) आत्मैषी जन: परेभ्य: किं न कुर्यात् ?

(ग) जन: आत्मन: किम् इच्छति ?

III. निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) "य: इच्छत्यात्मन: श्रेय:" अत्र कर्तृपदं किम् ?

(ख) "प्रभूतानि सुखानि" अत्र अनयो: पदयो: विशेषणपदं किम् ?

(ग) "दु:खानि" इति पदस्य विलोमपदं श्लोके किम् अस्ति ?

****************************************************************************************

उत्तराणि :- श्लोक: - 7. I. आत्मन: , प्रभूतानि , अहितम् । II. ... आत्मन: श्रेय: प्रभूतानि सुखानि च ... । ... अहितं कर्म ... । ... श्रेय: ... । III. य: , प्रभूतानि , x सुखानि ।

---

8. आचार: प्रथमो धर्म: इत्येतद् विदुषां वच: ।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषत: ॥

( अनुवादः :- व्यवहार सबसे पहला / बड़ा धर्म है । इस प्रकार यह विद्वानों का कथन है , इस लिए प्राणों से भी अच्छे व्यवहार की रक्षा करनी चाहिए । )

I. एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) आचार: कतम: धर्म: ?

( ख ) आचार: प्रथम: धर्म: इति एतत् केषां वच: ?

( ग ) सदाचारं केभ्य: अपि विशेषत: रक्षेत् ?

II. पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) विदुषां वच: किम् अस्ति ?

( ख ) विशेषत: किं रक्षेत् ?

( ग ) सदाचारं कथं रक्षेत् ?

III. निर्देशानुसारम् उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " एतत् विदुषां वच: अस्ति " अत्र कर्तृपदं किम् ?

( ख ) " प्रथमो धर्म: " अत्र अनयोः पदयोः विशेषणपदं किम् ?

( ग ) " मूर्खाणां " इति अर्थे श्लोके समानार्थकपदं किम् अस्ति ?

************************************************************************************

उत्तराणि :- श्लोक: - 8. I. प्रथम: , विदुषां , प्राणेभ्य: । II. ... " आचार: प्रथम: धर्म: " इति .... । ... सदाचारं ... । ... प्राणेभ्य: अपि ... । III. वचः , प्रथमः , x विदुषां । Q.NO.15. केषां , केभ्यः । Q.16.

**********************************************************************************************************

## द्वादश: पाठ: - " अन्योक्तयः "

अन्येषां कवीनां कृतिषु या: उक्तयः वर्तन्ते ता उक्तयः अन्योक्तयः ( अन्येषा म् उक्तयः ) कथ्यन्ते । अत्र तथाविधाः काश्चन अन्योक्तयः सङ्कलिता वर्तन्ते । अस्मिन् पाठे षष्ठश्लोकम् सप्तमश्लोकम् च अतिरिच्य ये श्लोकाः सन्ति ते पण्डितराजजगन्नाथस्य ' भामिनीविलास ' इति गीतिकाव्यात् सङ्कलिताः सन्ति । षष्ठः श्लोकः महाकविमाघस्य ' शिशुपालवधम् ' इति महाकाव्यात् गृहीतः अस्ति । सप्तमः श्लोकः महाकविभर्तृहरेः नीतिशतकात् उद्धृतः अस्ति ।

**********************************************************************************************************

1. एकेन राजहंसेन या शोभा सरसो भवेत् |
न सा बकसहस्रेण परितस्तीरवासिना ||

( अनुवादः :- एक राजहंस के द्वारा तालाब की जो शोभा होती है , वह शोभा सरोवर के चारों ओर किनारे पर निवास करने वाले हजारों बगुलों से भी नहीं होती है | )

I. एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) राजहंसेन कस्य शोभा भवति ?

( ख ) केन सरसः शोभा न भवति ?

( ग ) कीदृशेन बकसहस्रेण सरसः शोभा न भवति ?

II. पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) बकाः कुत्र वसन्ति ?

( ख ) बकसहस्रेण सरसः का न भवति ?

( ग ) केन सरसः शोभा भवति ?

III. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) " शोभा सरसो भवेत् " अत्र कर्तृपदं किम् ?

(ख) " एकेन राजहंसेन " अत्र अनयोः पदयोः विशेषणपदं किम् ?

(ग) " सरोवरस्य " इति पदस्य पर्यायपदं श्लोके किम् अस्ति ?

*****************************************************************************************

उत्तराणि :- I. सरसः , बकसहस्रेण , तीरवासिना । II. ... तीरे ..... । ... शोभा ... । राजहंसेन ..... । III. शोभा , एकेन , = सरसः |

*****************************************************************************************

2. भुक्ता मृणालपटली भवता निपीता -
न्यम्बूनि यत्र नलिनानि निषेवितानि ।
रे राजहंस ! वद तस्य सरोवरस्य ,
कृत्येन केन भवितासि कृतोपकारः ॥

( अनुवादः :- कवि प्रस्तुत श्लोक के माध्यम से कहता है , कि हे राजहंस ! जहां आपके द्वारा कमल नाल के समूहों को खाया गया है , जिस सरोवर के जल को भली - भांति पिया गया है तथा कमलों का सेवन किया गया है , उस सरोवर का तुम किस कार्य से प्रत्युपकार करोगे , बोलो | )

I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ½ x 2 = 1

(क) राजहंसेन का भुक्ता ?

(ख) राजहंसेन कानि निपीतानि ?

(ग) राजहंसेन कानि निषेवितानि ?

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) अस्मिन् श्लोके कविः कं सम्बोधयति ?

(ख) अस्मिन् श्लोके कविः किं पृच्छति ?

(ग) सरोवरे कानि कानि सन्ति ?

III. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) " केन भवितासि कृतोपकारः " अत्र क्रियापदं किम् ?

(ख) " कृत्येन केन " अत्र विशेष्यपदं किम् ?

(ग) " जलानि " इति अर्थे श्लोके समानार्थकपदं किम् अस्ति ?

*****************************************************************

उत्तराणि :- श्लोकः - 2. I. मृणालपटली , अम्बूनि , नलिनानि । II. ... राजहंस .... । ..... रे राजहंस ! वद तस्य सरोवरस्य केन कृत्येन कृतोपकारः भविता असि । .... मृणालपटली , अम्बूनि , नलिनानि च .... । III. असि , कृत्येन , x अम्बूनि |

*****************************************************************************************

3. तोयैरल्पैरपि करुणया भीमभानौ
मालाकार ! व्यरचि भवता या तरोरस्य पुष्टिः |
सा किं शक्या जनयितुमिह प्रावृषेण्येन वारां ,
धारासारानपि विकिरता विश्वतो वारिदेन ॥

( अनुवादः :- हे माली ! सूर्य के अत्यन्त ताप और भीषण गर्मी में थेडे से जल से भी तुम्हारे द्वारा करुणापूर्वक इस वृक्ष का जो पोषण किया गया है , ऐसा पोषण तो जल से युक्त वर्षाकाल में सभी ओर से जलधाराओं को बरसने वाली बादल / बादलों से भी नहीं किया जा सकता है |

I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ½ x 2 = 1

(क) मालाकारः कैः तरोः पुष्टिं कृतवान् ?

(ख) मालाकारेण कया / कथं अस्य तरोः पुष्टिः व्यरचि ?

(ग) मालाकारः कियद्भिः तोयैः तरोः पुष्टिं कृतवान् ?

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) मालाकारेण भीमभानौ निदाघे किं क्रियते ?

(ख) कान् विकरता वारिदेन पुष्टिः जनयितुं न शक्यते ?

(ग) अस्मिन् श्लोके कविः कस्य प्रशंसां करोति ?

III. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) "अस्य तरोः या पुष्टिः व्यरचि" अत्र क्रियापदं किम् ?

(ख) "अल्पैः तोयैः" अत्र विशेषणपदं किम् ?

(ग) "आतपे / ग्रीष्मकाले" इत्यर्थे श्लोके पर्यायपदं किम् अस्ति ?

************************************************************************************************

उत्तराणि :- श्लोकः - 3. I. तोयैः , करुणया , अल्पैः । II. .... अल्पैः तोयैः तरोः पुष्टिः ...... । धारासारान् ...... । ... मालाकारस्य .... । III. व्यरचि , अल्पैः , = निदाघे ।

************************************************************************************************

4. आपेदिरेऽम्बरपथं परितः पतङ्गाः ,
भृङ्गा रसलमुकुलानि समाश्रयन्ते ।
सङ्कोचमञ्चति सरस्त्वयि दीनदीनो ,
मीनो नु हन्त कतमां गतिमभ्युपैतु ॥

( अनुवादः :- पक्षियों ने चारों ओर से आकाश मार्ग को प्राप्त कर लिया है अर्थात् चारों ओर से घेर लिया है , भ्रमर आम की मञ्जरियों पर गुञ्जायमान हैं । हे सरोवर ! तुम्हारे सूख जाने अर्थात् संकुचित होने पर ये बेचारी मछलियां किस गति को प्राप्त करेंगी । )

I. एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) ½ x 2 = 1

(क) पतङ्गाः कुत्र आपेदिरे ?

(ख) के रसालमुकुलानि समाश्रयन्ते ?

(ग) कीदृशः मीनः नु कतमां गतिम् अभ्युपैतु ?

II. पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) सङ्कोचम् अञ्चति सरसि के के अन्यत्र गच्छन्ति ?

(ख) सङ्कोचम् अञ्चति सरसि कः नश्यति ?

(ग) कदा मीनानां हानिः भवति ?

III. यथानिर्देशम् उत्तरत - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) "पतङ्गाः परितः अम्बरपथम् आपेदिरे" अत्र कर्तृपदं किम् ?

(ख) "सङ्कोचम् अञ्चति त्वयि" अत्र विशेष्यपदं किम् ?

(ग) "भ्रमराः" इति पदस्य पर्यायपदं श्लोके किम् अस्ति ?

************************************************************************************************

उत्तराणि :- श्लोकः - 4. I. अम्बरपथं , भृङ्गाः , दीनदीनः । II. ... पतङ्गाः , भ्रमराः च .... । .... मीनः .... । सङ्कोचम् अञ्चति सरसि .... । III. पतङ्गाः , त्वयि , = भृङ्गाः ।

************************************************************************************************

केन्द्रीय विद्यालय संगठन

5. एक एव खगो मानी वने वसति चातकः |
पिपासितो वा म्रियते याचते वा पुरन्दरम् ||

( अनुवादः :- स्वाभिमानी पक्षी वन में रहता है | वह प्यासी ही मर जाता है अथवा केवल इंद्र के समक्ष ही जल के लिए याचना करता है | )

I. एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) कः वने वसति ?

( ख ) खगः कीदृशः अस्ति ?

( ग ) खगः कुत्र वसति ?

II. पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) कीदृशः खगः वने वसति ?

( ख ) कः पिपासितः म्रियते ?

( ग ) पिपासितः खगः कं याचते ?

III. यथानिर्देशम् उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " मानी खगः वने वसति " अत्र कर्तृपदं किम् ?

( ख ) " पिपासितः चातकः " अत्र विशेषणपदं किम् ?

( ग ) " पक्षी " इति पदस्य पर्यायपदं श्लोके किम् अस्ति ?

*****************************************************************************************

उत्तराणि :- श्लोकः - 5. I. खगः / चातकः , पिपासितः , वने । II. मानी / पिपासितः ..... । खगः / चातकः .... । ..... पुरन्दरं .... । III. चातकः , पिपासितः , खगः |

**********************************************************************************************************************

6. आश्वास्य पर्वतकुलं तपनोष्णतप्त -
मुद्दामदावविधुराणि च काननानि |
नानानदीनदशतानि च पूरयित्वा ,
रिक्तोऽसि यज्जलद ! सैव तवोत्तमा श्रीः ||

( अनुवादः :- सूर्य की गर्मी से संतप्त पर्वतों के समूह को संतुष्ट करके , ऊंचे वृक्षों से रहित वनों को संतुष्ट करके तथा अनेक नदियों और सैकडों नदी को जल से परिपूर्ण करके , हे बादल ! जो तुम रिक्त ( खाली ) हो गए हो | यही तुम्हारी श्रेष्ठ गति अर्थात् शोभा है | )

I. एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) कः पर्वतकुलम् आश्वसिति ?

( ख ) जलदानेन जलदस्य कीदृशी श्रीः भवति ?

( ग ) कः जलं ददाति ?

II. पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) सः कीदृशं पर्वतकुलम् आश्वसिति ?

( ख ) जलदः कानि पूरयति ?

( ग ) जलदः कथं रिक्तः भवति ?

III. यथानिर्देशम् उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " हे जलद ! यत् ( त्वं ) रिक्तः असि " अत्र क्रियापदं किम् ?

( ख ) " उत्तमा श्रीः " अत्र विशेष्यपदं किम् ?

( ग ) " पूर्णः " इति पदस्य विलोमपदं श्लोके किम् अस्ति ?

************************************************************************************

उत्तराणि :- श्लोकः - 6. I. जलदः , उत्तमा , जलदः । II. ... तपनोष्णतप्तं ... । ... नानानदीनदशतानि ... । .... नानानदीनदशतानि पूरयित्वा .... । III. असि , श्रीः , रिक्तं ।

************************************************************************************************

7. रे रे चातक ! सावधानमनसा मित्र ! क्षणं श्रूयता -
मम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः ।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा ,
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ।।

( अनुवादः :- हे मित्र चातक ! ( पपीहे ) तुम क्षणभर के लिए ध्यानपूर्वक मेरी बात को सुनो , आकाश में बहुत से बादल हैं , कुछ तो वर्षा करके पृथ्वी को जल से भिगो देते हैं और कुछ तो व्यर्थ ही गरजते रहते हैं | इसलिए तुम जिस - जिसको देखते हो उस - उस के समक्ष अपने दीनता युक्त वचन मत कहो अर्थात् हर किसी के सामने दीनता पूर्वक याचना नहीं करनी चाहिए | )

I. एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) गगने कति अम्भोदाः सन्ति ?

( ख ) कविः चातकपक्षिं कियत् कालं श्रोतुम् इच्छति ?

( ग ) कीदृशं वचः सर्वेषां पुरतः न वक्तव्यम् ?

II. पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) अम्भोदाः कथं वसुधाम् आर्द्रयन्ति ?

( ख ) के वृथा गर्जन्ति ?

( ग ) कुत्र दीनं वचः न वक्तव्यम् ?

III. यथानिर्देशम् उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " गगने हि बहवः अम्भोदाः सन्ति " अत्र कर्तृपदं किम् ?

( ख ) " अम्भोदा बहवः " अत्र विशेषणपदं किम् ?

( ग ) " भूमिं " इति पदस्य पर्यायपदं श्लोके किम् अस्ति ?

************************************************************************************

उत्तराणि :- श्लोकः - 7. I. बहवः , क्षणं / क्षनकालं , दीनं । II. .... वृष्टिभिः ... । केचिद् अम्भोदाः .... । यं यं पश्यसि तस्य तस्य पुरतो .... । III. अम्भोदाः , बहवः , वसुधां ।

************************************************************************************************

## Q.NO.14. पठित - नाट्यांशः - 5 अङ्काः ( अभ्यासाय पठित - नाट्यांशपाठाः :- 4 & 7 )

नाट्यांशः - 1 पाठः - 4 , शिशुलालनम् |

************************************************************************************************

Q.NO.14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5

( सिंहासनस्थः रामः । ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ कुशलवौ )

विदूषकः :- इत इत आर्यो !

कुशलवौ :- ( रामम् उपसृत्य प्रणम्य च ) अपि कुशलं महाराजस्य ?

रामः :- युष्मद्दर्शनात् कुशलमिव । भवतोः किं वयमत्र कुशलप्रश्नस्य भाजनम् एव , न पुनरतिथिजनसमुचितस्य

कण्ठाश्लेषस्य। (परिष्वज्य) अहो हृदयग्राही स्पर्श:। (आसनार्धमुपवेशयति)

उभौ :- राजासनं खल्वेतत् , न युक्तमध्यासितुम् ।

राम: :- सव्यवधानं न चरित्रलोपाय । तस्मादङ्क - व्यवहितमध्यास्यतां सिंहासनम् । (अङ्कमुपवेशयति)

उभौ :- (अनिच्छां नाटयत:) राजन्! अलमतिदाक्षिण्येन ।

राम: :- अलमतिशालीनतया ।

( अनुवाद: :- (श्रीराम सिंहासन पर बैठे हैं। तब विदूषक के द्वारा उपदेश किए जाते हुए तापस कुश और लव प्रवेश कराते हैं)

विदूषक :- आर्य! इधर इधर।

कुश और लव :- (राम के पास जाकर और प्रणाम करके) क्या महाराज कुशल हैं ?

राम :- आपके दर्शन से कुशल जैसा हूं। क्या हम कुशलप्रश्न के ही पात्र हैं तथा अतिथि लोगों के लिए उचित गले मिलने के क्या पात्र नहीं हैं? (आलिंगन करके) अहो ! कितना हृदय को मोह / छू लेने वाला स्पर्श है। (आधे आसान पर बैठाते हैं)

दोनों :- निश्चय ही यह राजा का सिंहासन है , यहां (हमारा) बैठना उचित नहीं है।

राम :- रुकावट के साथ आचरण करना चरित्र के लोप का कारण नहीं होता तो गोद के (हृदय) समीप होने के कारण सिंहासन पर बैठो। (गोद में बैठाते हैं)

दोनों :- (अनिच्छा का अभिनय करते हैं) महाराज! अधिक उदारता (कुशलता) न करें। ।

राम :- अत्यधिक शिष्टता न करें । )

**************************************************************************************************

(i) एकपदेन उत्तरत :- (केवलं प्रश्नद्वयम्) ½ x 2 = 1

(क) कौ प्रविशत: ?

(ख) कुशलवौ कं प्रणमतः ?

(ग) स्पर्श: कीदृश: आसीत् ?

(ii) पूर्णवाक्येन उत्तरत :- (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) लवकुशौ अनिच्छां नाटयत: रामं किम् अवदताम् ?

(ख) राम: कौ अङ्कमुपवेशयति ?

(ग) राम: लवकुशयो: कुशलप्रश्नस्य किम् उत्तरति ?

(iii) भाषिककार्यम् - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) " नाटयत: " इति क्रियापदस्य कर्तृपदं किमस्ति ?

(ख) " पात्रम् " इति अर्थे अत्र किं पदं प्रयुक्तम् ?

(ग) " तापसौ कुशलवौ " अत्र अनयोः पदयोः विशेष्यपदं किमस्ति ?

**************************************************************************************************

16. मञ्जूषायाः सहायतया अधोलिखितश्लोकस्य अन्वयं पूरयत - 1 x 4 = 4

** भवति शिशुजनो वयोऽनुरोधाद् , गुणमहतामपि लालनीय एव ।
व्रजति हिमकरोऽपि बालभावात् , पशुपति-मस्तक-केतकच्छदत्त्वम् ॥

अनुवाद: :- "बच्चा अपनी आयु के कारण से, गुणों से महान लोगों के द्वारा भी लालन के योग्य ही होता है । चाँद भी बालभाव की सुन्दरता के कारण से शिवजी के मस्तक पर केतकी के पुष्पों से बने जूड़े का रूप धारण कर लेता है "।

Q.NO.16. मञ्जूषा :- लालनीयः , बालभावात् , मस्तक , वय: ।

अन्वय: :- शिशुजन: ............ अनुरोधाद् , गुणमहताम् अपि .............. एव भवति । (यथा) .............

हिमकर: अपि पशुपति - केतकच्छदत्वं व्रजति ।

7. य इच्छत्यात्मन: श्रेय: प्रभूतानि सुखानि च ।
न कुर्यादहितं कर्म स परेभ्य: कदापि च ॥

अन्वयः :- य: ................ श्रेय: ................ सुखानि च इच्छति , स: .................. अहितं
कर्म कदापि न ................ ।

मञ्जूषा :- परेभ्य: , आत्मन: , कुर्यात् , प्रभूतानि ।

अथवा ( OR )

भावार्थ: :- यः मनुष्यः .................... प्रगतिं तथा अधिकं सुखं च ................ सः ................
दूषितं कार्यं न .................... ।

मञ्जूषा :- कुर्यात् , इच्छति , स्वस्य , अन्येभ्यः ।

************************************************************************************************

उत्तराणि :- अन्वयः :- आत्मन: , प्रभूतानि , परेभ्य: , कुर्यात् ।
भावार्थ: :- स्वस्य , इच्छति , अन्येभ्यः , कुर्यात् ।

************************************************************************************************

8. आचार: प्रथमो धर्म: इत्येतद् विदुषां वच: ।
तस्माद् रक्षेत् सदाचारं प्राणेभ्योऽपि विशेषत: ॥

अन्वयः :- आचार: ............... धर्म: इति एतत् ............... वच: , तस्मात् ...............
अपि सदाचारं विशेषत: ............... ।

मञ्जूषा :- विदुषां , प्राणेभ्य: , प्रथम: , रक्षेत् ।

अथवा ( OR )

भावार्थ: :- आचार: ........... धर्मः अस्ति , एवं ............... जनाः वदन्ति । अत: ...............
अपि विशेषरूपेण सदाचारः ........... ।

मञ्जूषा :- प्राणेभ्यः , संरक्षणीयः , विद्वांसः , प्रथम: ।

***************************************************************************************

उत्तराणि :- अन्वयः :- प्रथमः , विदुषां , प्राणेभ्यः , रक्षेत् ।

भावार्थः :- प्रथमः, विद्वांसः , प्राणेभ्यः , संरक्षणीयः ।

***************************************************************************************

LESSON :- 12

1. एकेन राजहंसेन या शोभा सरसो भवेत् ।
न सा बकसहस्रेण परितस्तीरवासिना ॥

अन्वयः :- एकेन राजहंसेन 1. ............... या 2. ................ भवेत् परितः 3. ............. बकसहस्रेण सा ( शोभा ) 4. ............. ( भवति ) ।

मञ्जूषा :- तीरवासिना , सरसः , न , शोभा ।

अथवा / OR

भावार्थः :- एकस्य .............. सहवासेन ............ ( नद्याः ) या शोभा भवेत् , सा शोभा तडागं ........... विद्यमानैः ............. संभवः नास्ति ।

मञ्जूषा :- बकसहस्रेण , परितः , तडागस्य , राजहंसस्य ।

***************************************************************************************

उत्तराणि :- श्लोकः - 1. अन्वयः :- सरसः , शोभा , तीरवासिना , न ।

भावार्थः :- राजहंसस्य , तडागस्य , परितः , बकसहस्रेण ।

***************************************************************************************

2. भुक्ता मृणालपटली भवता निपीता - न्यम्बूनि यत्र नलिनानि निषेवितानि ।
रे राजहंस ! वद तस्य सरोवरस्य , कृत्येन केन भवितासि कृतोपकारः ॥

अन्वयः :- यत्र भवता 1. ............ भुक्ता , अम्बूनि 2. ............. नलिनानि निषेवितानि , रे राजहंस ! तस्य 3. ................ केन कृत्येन कृतोपकारः 4. ................. असि ? वद ।

मञ्जूषा :- भविता , मृणालपटली , निपीतानि , सरोवरस्य ।

भावार्थः :- यत्र भवता ............... समूहं खादिता , ............. पीतं , कमलानि खादितानि , हे राजहंस ! तस्य ............... केन कर्मणा त्वं ................. करिष्यसि , वद ।

मञ्जूषा :- प्रत्युपकारं , तडागस्य , जलं , कमलनालानां ।

***************************************************************************************

उत्तराणि :- श्लोकः - 2. अन्वयः :- मृणालपटली , निपीतानि , सरोवरस्य , भविता ।

भावार्थः :- कमलनालानां , जलं , तडागस्य , प्रत्युपकारं ।

***************************************************************************************

3. तोयैरल्पैरपि करुणया भीमभानौ मालाकार ! व्यरचि भवता या तरोरस्य पुष्टिः ।
सा किं शक्या जनयितुमिह प्रावृषेण्येन वारां , धारासारानपि विकिरता विश्वतो वारिदेन ॥

अन्वयः :- 1. ............... भीमभानौ निदाघे अल्पैः तोयैः अपि 2. ................ करुणया अस्य तरोः या पुष्टिः व्यरचि । वारां 3. ................. विश्वतः धारासारान् अपि 4. ............... वारिदेन इह जनयितुं सा ( पुष्टिः ) किं शक्या ।

मञ्जूषा :- प्रावृषेण्येन , हे मालाकार ! , विकरता , भवता ।

भावार्थ: :- उद्यानपालक ! अतिग्रीष्मकाले अल्पेन ............ अपि करुणया अस्य वृक्षस्य यत् पोषणं त्वया .......... , वर्षाकाले परितः जलानां .......... जलधारान् अपि विकिरता तेन ......... अत्र सा पुष्टिः कर्तुं शक्या किम् ?

मञ्जूषा :- प्रवर्षणेन , कृतम् , मेघेन , जलेन ।

********************************************************************************

उत्तराणि :- श्लोकः - 3. अन्वयः :- हे मालाकार ! , भवता , प्रावृषेण्येन , विकरता ।
भावार्थ: :- जलेन , कृतम् , प्रवर्षणेन , मेघेन ।

********************************************************************************

4. आपेदिरेऽम्बरपथं परितः पतङ्गाः , भृङ्गा रसलमुकुलानि समाश्रयन्ते ।
सङ्कोचमञ्चति सरस्त्वयि दीनदीनो , मीनो नु हन्त कतमां गतिमभ्युपैतु ॥

अन्वयः :- पतङ्गाः परितः 1. .............. आपेदिरे , भृङ्गाः ( च ) रसालमुकुलानि 2. .......... । ( हे ) सरः ! 3. ............. सङ्कोचम् अञ्चति , हन्त दीनदीनः मीनः नु 4. ............... गतिम् अभ्युपैतु ।

मञ्जूषा :- कतमां , अम्बरपथम् , त्वयि , समाश्रयन्ते ।

भावार्थ: :- पक्षिणः .............. परितः प्राप्तवन्तः सन्ति । भ्रमराः ............ समाश्रितानि सन्ति । हे सरोवर ! त्वं यदा ............ याति तदा निराश्रितः दीनः च ........... कतमां गतिं प्राप्नोतु ?

मञ्जूषा :- आम्रपुष्पाणि , मीनः , शुष्कतां , आकाशमार्गं ।

********************************************************************************

उत्तराणि :- श्लोकः - 4. अन्वयः :- अम्बरपथम् , समाश्रयन्ते , त्वयि , कतमां ।
भावार्थ: :- आकाशमार्गं , आम्रपुष्पाणि , शुष्कतां , मीनः ।

********************************************************************************

5. एक एव खगो मानी वने वसति चातकः ।
पिपासितो वा म्रियते याचते वा पुरन्दरम् ॥

अन्वयः :- एक 1. ........... मानी खगः चातकः 2. .......... वसति । ( सः ) पिपासितः वा 3. ............ पुरन्दरम् याचते 4. ......... ।

मञ्जूषा :- म्रियते , एव , वा , वने ।

भावार्थ: :- एकः एव ...... ...... पक्षी चातकः वने ..........., यः पिपासितः सन् मरणं .......... अथवा देवेन्द्रं ............ याचनां करोति ।

मञ्जूषा :- प्राप्नोति , वर्षाजलस्य , वसति , स्वाभिमानी ।

********************************************************************************

उत्तराणि :- श्लोकः - 5. अन्वयः :- एव , वने , म्रियते , वा ।
भावार्थ: :- स्वाभिमानी , वसति , प्राप्नोति , वर्षाजलस्य ।

********************************************************************************

केन्द्रीय विद्यालय संगठन

6. आश्वास्य पर्वतकुलं तपनोष्णतप्त - मुद्दामदावविधुराणि च काननानि ।
नानानदीनदशतानि च पूरयित्वा , रिक्तोऽसि यज्जलद ! सैव तवोत्तमा श्रीः ॥

अन्वयः :- 1. ............ पर्वतकुलम् आश्वास्य उद्दामदावविधुराणि 2. ........... च ( आश्वास्य ) नानानदीनदशतानि 3. ......... च हे जलद ! यत् रिक्तः असि तव सा एव 4. ......... श्रीः ।

मञ्जूषा :- काननानि , पूरयित्वा , उत्तमा , तपनोष्णतप्तं ।

भावार्थः :- सूर्यतापेन तप्तं .............. समूहं आश्वास्य उन्नतवृक्षरहितानि .............. आश्वास्य अनेक - नदी - तडागादीन् च जलैः ................ च हे मेघ ! त्वं रिक्तः जातः असि तस्याम् अवस्थायाम् अपि त्वं ............... ।

मञ्जूषा :- शोभते , पूरयित्वा , वनानि , पर्वतानां ।

********************************************************************************

उत्तराणि :- श्लोकः - 6. अन्वयः :- तपनोष्णतप्तं , काननानि , पूरयित्वा , उत्तमा ।
भावार्थः :- पर्वतानां , वनानि , पूरयित्वा , शोभते ।

********************************************************************************

7. रे रे चातक ! सावधानमनसा मित्र ! क्षणं श्रूयता -
मम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः ।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा ,
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ॥

अन्वयः :- रे रे मित्र ! 1. .......... सावधानमनसा क्षणं श्रूयताम् , गगने हि बहवः अम्भोदाः 2. .............. , सर्वे अपि एतादृशाः न ( सन्ति ) केचित् 3. .............. वृष्टिभिः आर्द्रयन्ति , केचिद् ( अम्भोदाः ) वृथा गर्जन्ति , ( अतः त्वम् ) यं यं 4. ........... तस्य तस्य पुरतः दीनं वचः मा ब्रूहि ।

मञ्जूषा :- वसुधां , पश्यसि , चातक ! , सन्ति ।

भावार्थः :- हे हे मित्र चातक ! ............... क्षणं शृणु , आकाशे निश्चयेन बहवः ........... सन्ति , सर्वे अपि ईदृशाः न सन्ति केचित् भूमिं .............. आर्द्रयन्ति , केचित् च वृथा ............ कुर्वन्ति , त्वम् अपि यं यं पश्यसि तं तं स्वदीनकथां न श्रावय ।

मञ्जूषा :- शब्दघोषं , वृष्टिजलैः , मेघाः , सावहितमनसा ।

********************************************************************************

उत्तराणि :- श्लोकः - 7. अन्वयः :- चातक ! , सन्ति , वसुधां , पश्यसि ।
भावार्थः :- सावहितमनसा , मेघाः , वृष्टिजलैः , शब्दघोषं ।

********************************************************************************

********************************************************************************

**Q.NO. 17.** घटनाक्रमानुसारं वाक्यानि पुन: लिखत - ½ x 8 = 4

सूचना :- प्रत्येकस्य पाठस्य संस्कृतभाषया / हिन्दी भाषया सारांशं लिखित्वा अवगच्छन्तु ।

यथा :- द्वितीय: पाठ: :- "बुद्धीर्बलवती सदा" संक्षिप्तरूपेण पाठस्य सारांश: :-

1. देउलाख्य - ग्रामे राजसिंह: वसति स्म ।
2. तस्य भार्या बुद्धिमती पुत्रद्वयोपेता पितुर्गृहं गच्छति ।
3. मार्गे सा व्याघ्रम् अपश्यत् ।
4. सा पुत्रौ चपेटया प्रहृत्य अवदत् । - "कथं कलहं कुरुथ:" इति ।
5. अयमेक: विभज्य भुज्यताम् , पश्चात् द्वितीय: लक्ष्यते ।
6. एतत् श्रुत्वा व्याघ्र: भयाकुलचित्त: पलायित: ।
7. भयाकुलं व्याघ्रं दृष्ट्वा शृगाल: अवदत् - " भवान् पलायित: " इति ।
8. भीत: व्याघ्र: जम्बुकं गूढप्रदेशं गन्तुं वदति ।
9. सा व्याघ्रमारी मां हन्तुम् आगच्छति इति मत्वा व्याघ्र: पलायित: ।
10. शृगाल: व्याघ्रं वदति - " किं त्वं मानुषात् बिभेति " इति ।
11. मया / व्याघ्रेण प्रत्यक्षमेव स्वपुत्रौ प्रहरन्ती सा दृष्टा ।
12. स्वामिन् पुन: तत्र गम्यताम् - यदि सा त्वां पश्यति तर्हि त्वं मां मारय ।
13. शृगाल ! यदि त्वं मां मुक्त्वा गच्छसि तर्हि मम गति: का ?
14. व्याघ्र: शृगालं निजगले बद्ध्वा चलति ।
15. सा बुद्धिमती श्रृगालेन सहितं आगच्छन्तं व्याघ्रं पश्यति ।
16. सा प्रत्युत्पन्नमति: जम्बुकम् अंगुल्या तर्जयति ।
17. पुरा श्रृगालेन तस्यै व्याघ्रत्रयम् दत्तम् ।
18. अधुना एकं व्याघ्रम् आनीय गन्तुम् इच्छति ।
19. व्याघ्रमारी शीघ्रम् शृगालम् मारयितुं धावितां दृष्ट्वा गलबद्ध - शृगालक: व्याघ्र: पलायित: ।
20. बुद्धिमती पुन: व्याघ्रजात् भयात् मुक्ता अभवत् ।
21. बुद्धीर्बलवती तन्वि सर्वकार्येषु सर्वदा ।

**Q.NO. 17.** अभ्यासार्थम् :- * घटनाक्रमानुसारं वाक्यानि पुन: लिखत - ½ x 8 = 4

क ) व्याघ्र: व्याघ्रमारी इयमिति मत्वा पलायित: ।
ख ) प्रत्युत्पन्नमति: सा शृगालं आक्षिपन्ती उवाच ।
ग ) जम्बुककृतोत्साह: व्याघ्र: पुन: काननम् आगच्छत् ।
घ ) मार्गे सा एकं व्याघ्रम् अपश्यत् ।
ङ ) व्याघ्रं दृष्ट्वा सा पुत्रौ ताडयन्ती उवाच - "अधुना एकमेव व्याघ्रं विभज्य भुज्यताम्" इति ।
च ) बुद्धिमती पुत्रद्वयेन उपेता पितुर्गृहं प्रति चलिता ।
छ ) " त्वं व्याघ्रत्रयम् आनयितुं " प्रतिज्ञाय एकमेव आनीतवान् ।
ज ) गलबद्धश्रृगालक: व्याघ्र: पुन: पलायित: ।

*************************************************************************************

Q.NO.17. अधोलिखित - कथांशं समुचितक्रमेण लिखत - ½ x 8 = 4

( i ) विविधा: पक्षिण: अपि सिंहस्य एतादृशीं दशां दृष्ट्वा हर्षमिश्रितं कलरवं कुर्वन्ति ।

( ii ) वनस्य समीपे एवैका नदी वहति ।

( iii ) एक: सिंह: सुखेन विश्राम्यते तदैव एक: वानर: आगत्य तस्य पुच्छं धुनोति ।

( iv ) क्रुद्ध: सिंह: इतस्तत: धावति , गर्जति परं किमपि कर्तुमसमर्थ: एव तिष्ठति ।

( v ) वानरा: वृक्षोपरि स्थिता: हसन्ति ।

( vi ) क्रुद्ध: सिंह: तं प्रहर्तुमिच्छति परं वानरस्तु कूर्दित्वा वृक्षमारूढ: ।

( vii ) एवमेव वानरा: वारं वारं सिंहं तुदन्ति ।

( viii ) तदैव अन्यस्मात् वृक्षात् अपर: वानर: सिंहस्य कर्णमाकृष्य पुन: वृक्षोपरि आरोहति ।

*****************************************************************************************************

## Q.NO.18. भाषिक - तत्त्वानि :- कर्तृपदं / क्रियापदं / विशेषण / विशेष्य / पर्याय / विलोमपदम् - 3 अङ्का:
( बहुविकल्पात्मका: / MCQs )

Q.NO.18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत -

( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

प्रश्नपत्र में :-

Q.NO.1. IV. भाषिकम् - MCQs - 3 Marks

Q.NO.12. III. प्रदत्तपठित - गद्याधारित - वाक्यात् निर्देशानुसारम् उत्तरं चित्वा लिखत - 2 Marks

Q.NO.13. III. प्रदत्तपठित - पद्याधारित - वाक्यात् निर्देशानुसारम् उत्तरं चित्वा लिखत - 2 Marks

Q.NO.14. III. प्रदत्तपठितनाट्यांशाधारितवाक्यात् निर्देशानुसारम् उत्तरं चित्वा लिखत - 2 Marks.

& Q.NO.18. प्रदत्तपाठाधारित - वाक्ये रेखाङ्कितपदस्य प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत - 3

( 12 अङ्कों के लिए इन भाषिक तत्त्वों पर ध्यान देना चाहिए ) TOTAL 12 Marks

*****************************************************************************************************

ध्यातव्य - विषया: :- प्रदत्त - विकल्प / MCQs - पदेषु शुद्धपदज्ञानाय अधोलिखित - तालिकां पश्याम: -

| क्रमसंख्या | प्रदत्तपद ज्ञानम् । ( विशेष्य - विशेषण पदे इव ) | उचित - अर्थ - मेलनम् । उदाहरणानि |
|---|---|---|
| 1 | लिंग , विभक्ति , वचन - आधारेण | गात्रम् = शरीरम्<br>अरय: = शत्रव:<br>अनभिज्ञ: = अपरिचित:<br>दशनै: = दन्तै :<br>प्रवर्ष: = वृष्टि: |
| 2 | तुमुन् ( प्रत्ययान्तपदं ) | अत्तुं = भक्षयितुम् |
| 3 | क्त्वा & ल्यप् | आकार्ण्य = श्रुत्वा , निशम्य<br>विहाय = त्यक्त्वा<br>आदाय = गृहीत्वा |
| 4 | विभिन्न - लिंग , विभक्ति , वचन आधारेण | उपचय: = अभिवृद्धि:<br>जरा = वार्धक्यम्<br>तनु: = शरीरम्<br>जवेन = तीव्रगत्या |

एवमेव सन्दर्भ - अनुसारम् परीक्षायां रेखाङ्कित - पदानां ज्ञानेन प्रदत्त - विकल्पेभ्य: शुद्ध - उत्तर - चयनं करणीयम् ।

अभ्यासार्थम् :-

Q.NO.18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत -

( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

1. नवमालिका रसालं मिलिता । पुष्पम् / आम्रम् / मञ्जरी / वनम्
2. पिको वसन्तस्य गुणं वेत्ति न वायस: । वयस्य / कोकिल: / काक: / पिक:
3. व्याघ्रोऽपि सहसा नष्ट: । रक्षित: / पलायित: / नयनं / आगत:
4. सः परिश्रमेण भूरि वित्तमुपार्जितवान् । भारं / अधिकं / भयं / स्वल्पं

Q.NO.18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थं चित्वा लिखत -

( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

( i ) गच्छ त्वमपि किञ्चित् गूढप्रदेशम् ।
( क ) गुप्तप्रदेशम् ( ख ) नगरम् ( ग ) ग्रामम् ( घ ) गृहं

( ii ) वयस्य , अपूर्वं खलु नामधेयम् ।
( क ) वृद्ध ! ( ख ) पथिक ! ( ग ) मित्र ! ( घ ) युवक !

( iii ) आर्य ! अलीकम् एतत् ।
( क ) अल्पम् ( ख ) सत्यम् ( ग ) अचिरम् ( घ ) असत्यम्

( iv ) पिता यच्छति पुत्राय बाल्ये विद्याधनं महत् ।
( क ) भाग्ये ( ख ) शैशवे ( ग ) बालके ( घ ) वृद्धाप्ये

Q.NO.18. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकूलम् उचितार्थान् चित्वा लिखत -

( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

अथवा / OR **** ( प्रश्न इस प्रकार भी पूच्छने की संभावना है )

Q.NO.18. यथानिर्देशं अधोलिखितवाक्येभ्यः प्रसङ्गानुकूलम् प्रदत्त - पदस्य शुद्धार्थचयनं कुरुत -

( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

( चयनम् = Choose / pick up the correct word from given sentence . )

( i ) " दुर्दान्तैर्दशनै: अमुना स्यान्नैव जनग्रसनम् " इत्यस्मिन् वाक्ये " दन्तै: " इति अर्थे किं पदमस्ति ?

( ii ) " स: दीन: इति जानन्नपि कृषक: तं पीडयति " इत्यस्मिन् वाक्ये " निर्बल: " इति अर्थे किं पदमस्ति ?

( iii ) " भयाकुलं व्याघ्रं दृष्ट्वा कश्चित् धूर्त: शृगाल: हसन्नाह - " इत्यस्मिन् वाक्ये " विलोक्य " इति अर्थे किं पदमस्ति ?

( iv ) " क्रोधो हि शत्रु: प्रथमो नराणां " इत्यस्मिन् वाक्ये " मनुष्याणां " इति अर्थे किं पदमस्ति ?

( v ) " काक: कृष्ण: पिक: कृष्ण: को भेद: पिककाकयो: " इत्यस्मिन् वाक्ये " कोकिल: " इति अर्थे किं पदमस्ति ?

( vi ) " करुणापरो गृही तस्मै आश्रयं प्रायच्छत् " इत्यस्मिन् वाक्ये " दयावान् " इति अर्थे किं पदमस्ति ?

( vii ) " विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्त: प्रकीर्तिता: " इत्यस्मिन् वाक्ये " पण्डिता: " इति अर्थे किं पदमस्ति ?

**************************************************************************************************

Q.NO.18. अधोलिखितवाक्येषु रेखाङ्कितपदानां कृते प्रदत्त - विकल्पेभ्यः उचितम् अर्थं चित्वा लिखत - 1 x 3 = 3

## LESSON - 1. शुचिपर्यावरणम् ।

1. " शतशकटीयानं कज्जलमलिनं धूमं <u>मुञ्चति</u> " ।
   ( क ) पिबति ( ख ) त्यजति ( ग ) पतति ( घ ) मन्यते
2. " अत्र जीवितं <u>दुर्वहं</u> जातं प्रकृतिरेव मे शरणम् " ।
   ( क ) सुखं ( ख ) वहनं ( ग ) कठिनम् ( घ ) खननम्
3. " महानगरमध्ये चलत् <u>अनिशं</u> कालायसचक्रम् " ।
   ( क ) रात्रौ ( ख ) प्रातः ( ग ) अनायासः ( घ ) अहर्निशं
4. " बाष्पयानमाला <u>ध्वानं</u> वितरन्ती संधावति " ।
   ( क ) शब्दं ( ख ) धनं ( ग ) धावनं ( घ ) जलं
5. " इदानीं वायुमण्डलं <u>भृशं</u> दूषितं अस्ति " ।
   ( क ) भूषणं ( ख ) भागं ( ग ) अत्यधिकं ( घ ) भूमिः
6. " <u>जगति</u> बहिः अन्तः च बहुशुद्धीकरणं भवेत् " ।
   ( क ) लोके ( ख ) वृक्षे ( ग ) भूमौ ( घ ) आकाशे
7. " नवमालिका <u>रसालं</u> मिलिता अस्ति " ।
   ( क ) रसं ( ख ) आलयं ( ग ) आम्रम् ( घ ) वायुं
8. " मनः शोषयत् <u>तनुः</u> पेषयत् सदा वक्रम् भ्रमति " ।
   ( क ) वयः ( ख ) शरीरं ( ग ) पयः ( घ ) मधु
9. " <u>समीरेण</u> चा लिता कुसुमावलिः रमणीया अस्ति " ।
   ( क ) आकाशेन ( ख ) समयेन ( ग ) वायुना ( घ ) जलेन
10. " दुर्दान्तैः <u>दशनैः</u> अमुना स्यान्नैव जनग्रसनम् " ।
    ( क ) अशनैः ( ख ) सोपानैः ( ग ) कठिनैः ( घ ) दन्तैः

*********************************************************************************************

## LESSON - 2. बुद्धिर्बलवती सदा ।

1. " तस्य भार्या बुद्धिमती पुत्रद्वय - <u>उपेता</u> पितुर्गृहं प्रति चलिता " ।
   ( क ) पत्नी ( ख ) उपायः ( ग ) गता ( घ ) युक्ता
2. " तस्याः <u>पुत्रौ</u> व्याघ्रभक्षणाय कलहं कुरुतः " ।
   ( क ) मित्रे ( ख ) सुतौ ( ग ) बालकौ ( घ ) वृक्षौ
3. " त्वं मां निजगले बद्ध्वा <u>सत्वरम्</u> चल " ।
   ( क ) शीघ्रं ( ख ) शनैः ( ग ) पुनः ( घ ) किञ्चित्
4. " गृहीतकरजीवितो व्याघ्रः शीघ्रं तदग्रतः <u>नष्टः</u> " ।
   ( क ) आगतः ( ख ) पलायितः ( ग ) खादितः ( घ ) दृष्टः

*********************************************************************************************

## LESSON - 4 शिशुलालनम् ।

1. " <u>हिमकरः</u> अपि बालभावात् पशुपति - मस्तककेतकच्छदत्वं व्रजति " ।
   ( क ) सूर्यः ( ख ) चन्द्रः ( ग ) हिमालयः ( घ ) हिमः
2. " श्रीरामः लवकुशौ <u>अङ्कम्</u> उपवेशयति " ।
   ( क ) हस्तं ( ख ) पादं ( ग ) नेत्रं ( घ ) क्रोडं
3. " अस्माकं वंशस्य कर्ता <u>सहस्रदीधितिः</u> "

(क) रामः (ख) सूर्यः (ग) चन्द्रः (घ) वाल्मीकिः

4. "किं <u>कुपिता</u> एवं भणति उत प्रकृतिस्था ?" ।

(क) प्रसन्ना (ख) पीता (ग) क्रुद्धा (घ) दृष्टा

5. "भो ! <u>वासव!</u> अहं पुत्रस्य दैन्यं दृष्ट्वा रोदिमि" ।

(क) शिव! (ख) इन्द्र ! (ग) विष्णो! (घ) वृषभ !

6. "दुर्बले सुते मातुः अभ्यधिका कृपा <u>सहजा</u> एव आसीत्" ।

(क) स्वाभाविकी (ख) सङ्गतिः (ग) जरा (घ) अस्वाभाविकी

7. "भद्रे ! सहस्राधिकेषु पुत्रेषु अस्मिन्नेव <u>वात्सल्यं</u> कथम् ?" ।

(क) स्नेहभावः (ख) वत्सः (ग) द्वेषः (घ) शत्रुत्वं

8. "अचिरादेव चण्डवातेन मेघरवैश्च सह <u>प्रवर्षः</u> समजायत" ।

(क) हर्षः (ख) जलं (ग) आकाशः (घ) वर्षा

***************************************************************************************************

## LESSON - 5

1. " तयोः बलीवर्दयोः एकः शरीरेण दुर्बलः <u>जवेन</u> गन्तुम् अशक्तश्चासीत् " ।

(अ) शनैः (ब) जलेन (स) पादेन (द) वेगेन

2. " सः <u>कृच्छ्रेण</u> भारमुद्वहति " ।

(अ) कोपेन (ब) कष्टेन (स) आनन्देन (द) सरलतया

3. " बहूनि <u>अपत्यानि</u> मे सन्तीति सत्यम् " ।

(अ) उचितानि (ब) सन्ततयः (स) फलानि (द) धनानि

4. " गच्छ वत्से ! सर्वं <u>भद्रं</u> जायेत ।"

(अ) शुभं (ब) भयं (स) बलं (द) मोहः

***************************************************************************************************

## LESSON - 6

1. आलस्यं हि मनुष्याणां शरीरस्थो महान् <u>रिपुः</u> ।

(क) वपुः (ख) शत्रुः (ग) मित्रं (घ)

2. <u>करी</u> च सिंहस्य बलं न मूषकः ।

(क) काकः (ख) व्याघ्रः (ग) कपोतः (घ) गजः

3. <u>निमित्तम्</u> उद्दिश्य हि यः प्रकुप्यति ।

(क) विहयं (ख) निर्माणं (ग) कारणं (घ) सत्यं

4. <u>हयाः</u> च नागाश्च वहन्ति बोधिताः ।

(क) अश्वाः (ख) धेनवः (ग) गजाः (घ) मृगाः

5. यथास्थितः काष्ठगतो हि <u>वह्निः</u> ।

(क) जलं (ख) भूमिः (ग) वायुः (घ) अग्निः

6. समान - शील - व्यसनेषु <u>सख्यम्</u> ।

(क) मित्रता (ख) शत्रुता (ग) सर्वं (घ) व्यवहारः

7. उदये <u>सविता</u> रक्तो रक्तश्चास्तमये तथा ।

(क) रुद्रः (ख) इन्द्रः (ग) सूर्यः (घ) चन्द्रः

***************************************************************************************************

## LESSON - 7 सौहार्दं प्रकृतेः शोभा ।

(क) अस्माकं <u>ऐक्यं</u> विश्वप्रथितम् ।

(अ) मित्रं (ब) एकता (स) लघु (द) कनिष्ठः

(ख) अङ्गुष्ठोदकमात्रेण <u>शफरी</u> फुर्फुरायते ।

(अ) दीर्घ मत्स्यः (ब) लघु मत्स्यः (स) मीनः (द) न कोऽपि

(ग) अहम् तव <u>सन्ततिं</u> पालयामि ।

( अ ) समानम्  ( ब ) पुत्रीं  ( स ) पुत्रं  ( द ) सन्तानं

( घ ) अहं स्वशुण्डेन पोथयित्वा मारयिष्यामि ।

( अ ) खादयित्वा  ( ब ) हनिष्यामि  ( स ) पीडयित्वा  ( द ) आकर्ष्य

***

LESSON - 8 ,  विचित्रः साक्षी ।

( क ) अर्थकार्श्येन पीडितः सः पदातिः एव प्राचलत् ।

( अ ) कृपणतया  ( ब ) धनस्य अभावेन  ( स ) धनस्य आधिक्येन  ( द ) धनस्य प्रचुरता

( ख ) प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा ।

( अ ) एकान्ते  ( ब ) विरक्ते  ( स ) निर्गन्धे  ( द ) प्रदूषणे

( ग ) सर्वं वृत्तम् अवगत्य सः तं निर्दोषम् अमन्यत ।

( अ ) गत्वा  ( ब ) आगत्य  ( स ) ज्ञात्वा  ( द ) ज्ञानं

( घ ) त्वया अहं चोरितायाः मञ्जूषायाः ग्रहणाद् वारितः ।

( अ ) गृहीतः  ( ब ) निवारितः  ( स ) धावितः  ( द ) द्वारे

***

LESSON - 9  सूक्तयः ।

1. पिताऽस्य किं तपस्तेपे इति उक्तिः तत्कृतज्ञता ।

( अ ) उवाच  ( ब ) कथनं  ( स ) श्रवणं  ( द ) मननं

2. अवक्रता यथा चित्ते तथा वाचि भवेद् यदि ।

( अ ) चिरं  ( ब ) वचने  ( स ) पुस्तके  ( द ) मनसि

3. त्यक्त्वा धर्मप्रदां वाचं परुषां योऽभ्युदीरयेत् ।

( अ ) कठिनां  ( ब ) पुरुषं  ( स ) मृदुलां  ( द ) मधुरं

4. अन्येषां वदने ये तु ते चक्षुर्नामिनी मते ।

( अ ) लोके  ( ब ) शरीरे  ( स ) मुखे  ( द ) गात्रे

5. य इच्छत्यात्मनः श्रेयः प्रभूतानि सुखानि च ।

( अ ) श्रीः  ( ब ) कल्याणं  ( स ) इच्छां  ( द ) पवनः

***

LESSON - 12  अन्योक्तयः ।

1. एकेन राजहंसेन या शोभा सरसो भवेत् ।

( अ ) सरोवरस्य  ( ब ) सरोवरः  ( स ) समुद्रस्य  ( द ) नद्याः

2. निपीतानि अम्बूनि यत्र नलिनानि निषेवितानि ।

( अ ) अम्बराणि  ( ब ) अम्बोदः  ( स ) कमलानि  ( द ) जलानि

केन्द्रीय विद्यालय संगठन

3. मालाकार ! व्यरचि भवता या तरोः अस्य पुष्टिः ।

( अ ) तरुः  ( ब ) वृक्षस्य  ( स ) उद्यानस्य  ( द ) पुष्पाणां

4. आपेदिरेऽम्बरपथं परितः पतङ्गाः ।

( अ ) पक्षिणः  ( ब ) जनाः  ( स ) पशवः  ( द ) मेघाः

5. पिपासितो वा म्रियते याचते वा पुरन्दरम् ।

( अ ) वरुणं  ( ब ) मेघं  ( स ) इन्द्रं  ( द ) पुरुषं

6. रिक्तोऽसि यज्जलद ! सैव तवोत्तमा श्रीः ।

( अ ) सम्पत्तिः  ( ब ) सङ्गतिः  ( स ) वरं  ( द ) जनं

7. अम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः ।

( अ ) भूमौ ( ब ) मार्गे ( स ) ग्रामे ( द ) आकाशे

********************************************************

उत्तराणि :-

LESSON - 1. त्यजति , कठिनम् , अहर्निशं , शब्दं , अत्यधिकं , लोके , आम्रम् , शरीरं , वायुना , दन्तैः ।

LESSON - 2. युक्ता , सुतौ , शीघ्र , पलायितः ।

LESSON - 4. चन्द्रः , क्रोडं , सूर्यः , क्रुद्धा , इन्द्र ! , स्वाभाविकी , स्नेहभावः , वर्षा ।

LESSON - 5 वेगेन , कष्टेन , संततयः , शुभं ।

LESSON - 6. शत्रुः , गजः , कारणं , अश्वाः , अग्निः , मित्रता , सूर्यः ।

LESSON - 7. एकता , लघु मत्स्यः , सन्तानं , पीडयित्वा ।

LESSON - 8. धनस्य अभावेन , एकान्ते , ज्ञात्वा , निवारितः ।

LESSON - 9 कथनं , मनसि , कठिनां , मुखे , कल्याणं ।

LESSON - 12 सरोवरस्य , जलानि , वृक्षस्य , पक्षिणः , इन्द्रं , सम्पत्तिः , आकाशे ।

*************************************** इति शम् ****************************************

## अभ्यासार्थम् आदर्श - प्रश्नपत्रम् - 2023 - 24.

| | | | | |
|---|---|---|---|---|
| कक्षा :- दशमी | विषयः :- संस्कृतम् | कोड् :- 122 | समयः : होरात्रयम् | अङ्काः : 80 |
| CLASS :- 10 | SUBJECT :- SANSKRIT | Code :- 122. | Time : 3 hrs | Marks : 80 |

********************************************************

प्रश्नपत्रस्वरूपम् :-

| | | | | |
|---|---|---|---|---|
| “ क ” खण्डः | : | अपठित - अवबोधनम् | 10 | अङ्काः |
| “ ख ” खण्डः | : | रचनात्मकं कार्यम् | 15 | अङ्काः |
| “ ग ” खण्डः | : | अनुप्रयुक्तव्याकरणम् | 25 | अङ्काः |
| “ घ ” खण्डः | : | पठित - अवबोधनम् | 30 | अङ्काः |

********************************************************

### “ क ” खण्डः ( SECTION A ) अपठित - अवबोधनम् 10 अङ्काः :

1. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत -

विश्वामित्र एकः नृपः आसीत् | तस्य बलेन सर्वे भयभीता भवन्ति स्म | एकदा स मुने वशिष्ठस्य आश्रमम् अगच्छत् | मुनिः तस्य अतीव सम्मानम् अकरोत् | आश्रमे विश्वामित्रः ‘ नन्दिनी ’ इति नाम्नः धेनुम् अपश्यत् | तस्याः रूपं दृष्ट्वा गुणान् च ज्ञात्वा तस्य मनसि लोभः जाग्रतः अभवत् | सः वशिष्ठं तां धेनुम् अयाचत | परन्तु वशिष्ठः विश्वामित्राय धेनुं न अयच्छत् | तदा क्रोधवशात् विश्वामित्रः स्व - सैनिकान् तां धेनुं हर्तुम् आदिष्टवान् | वशिष्ठः निर्भयः भूत्वा अवदत् - “ कोऽपि मम आज्ञां विना एनां धेनुं स्प्रष्टुम् अपि न शक्नोति ” इति | विश्वामित्रः वशिष्ठस्य “ आत्मबलं दृष्ट्वा विस्मितः अभवत् | सः अनायासम् अवदत् - “ धिक् बलं ! क्षत्रियबलं !, ब्रह्मतेजो बलं बलम् ” इति | तदनन्तरं विश्वामित्रः घोरतपस्यां कृत्वा ब्रह्मतेजः प्राप्नोत् |

( अ ) एकपदेन उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( i ) विश्वामित्रः नन्दिनीम् कुत्र अपश्यत् ?

( ii ) कस्य लोभः जाग्रतः अभवत् ?

( iii ) धेनोः नाम किम् आसीत् ?

( आ ) पूर्णवाक्येन उत्तरत - ( केवलं प्रश्नद्वयम् ) 2 x 2 = 4

( i ) विश्वामित्रः कथं विस्मितः अभवत् ?

( ii ) विश्वामित्रः क्रोधवशात् किं कृतवान् ?

( iii ) वशिष्ठः निर्भयः भूत्वा किम् अवदत् ?

( इ ) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत। 1

( ई ) यथानिर्देशम् उत्तरत । ( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

( i ) ' अपश्यत् ' इति क्रियापदस्य कर्तृपदं किम् ?

( क ) नन्दिनी ( ख ) वशिष्ठः ( ग ) विश्वामित्रः ( घ ) लोभः

( ii ) ' वशिष्ठः निर्भयः ' अनयोः पदयोः विशेष्यपदं किम् ?

( क ) निर्भयः ( ख ) वशिष्ठः ( ग ) वशिष्ठः निर्भयः ( घ ) न किमपि

( iii ) अनुच्छेदे ' आश्चर्यचकितः ' इति पदस्य समानार्थकशब्दः कः प्रयुक्तः ?

( क ) नृपः ( ख ) निर्भयः ( ग ) जाग्रतः ( घ ) विस्मितः

( iv ) अनुच्छेदे ' दोषान् ' इति पदस्य कः विलोमशब्दः प्रयुक्तः ?

( क ) गुणान् ( ख ) सैनिकान् ( ग ) आदिष्टवान् ( घ ) अगच्छन्

" ख " खण्डः ( SECTION B ) रचनात्मकम् कार्यम् 15 अङ्काः

2. लघु भ्रातरं सोमेशं प्रति लिखितं अधः पत्रं मञ्जूषापदसहायतया पूरयित्वा पुनः लिखत - ½ x 10 = 5

पटेल् छात्रावासः ,

( i ) .................

दिनाङ्कः : 07 / 12 / 2022

प्रिय भ्रातः ! ( ii ) ............... !

( iii ) ............. आशिषः ।

अत्र ( iv ) .......... कुशलं वर्तते , तत्रापि कुशलमिति मन्ये | ह्यः अहं तव पत्रं ( v ) .......... । तव परीक्षा परिणामः ( vi ) .............. अस्ति , परं ( vii ) ................ भवता न्यूनाः अङ्काः प्राप्ताः इति सखेदं मया ज्ञातम् । ( viii ) ............ प्रतिदिनं प्रातः काले उत्थाय गणितस्य अभ्यासं कुरु । गणित - अध्यापकं च पुनः पुनः प्रश्नान् पृच्छ । अभ्यासेन एव सर्वाणि ( ix ) .............. सिध्यन्ति । पित्रोः चरणयोः सादरं प्रणामाः ।

( x ) ............. अग्रजः ,

सुनीलः ।

मञ्जूषा :-

| |
|---|
| प्राप्तवान् , गणितविषये , कार्याणि , आनन्ददायकः , त्वं , सस्नेहं , सोमेश , भवदीयः , दिल्लीतः , सर्वगतं , । |

3. अध: प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत - 1 x 5 = 5



मञ्जूषा :- | बालिका , बालकः , वृक्षाः , चित्रपतङ्गाः , पुष्पाणि , डयन्ते , उपरि , मेघः , क्रीडतः , उद्याने । |

अथवा ( OR )

मञ्जूषाप्रदत्तपदानां साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभि: संस्कृतवाक्यै: एकम् अनुच्छेदं लिखत ।

" मम प्रियपुस्तकम् "

मञ्जूषा :- | रामायणम् , रामस्य चरित्रं , वाल्मीकिः , सीतायाः कथा , लङ्कादाहनम् , गुणाः , रोचते , पितुः आज्ञापालनं , रामभक्तः हनुमान् , लक्षमणः , भ्रातृस्नेहः । |

4. अधोलिखितानि वाक्यानि संस्कृतभाषया अनूद्य लिखत - ( केवलं वाक्यपञ्चकम् ) 1 x 5 = 5

( 1 ) खेल के मैदान में लडके खेलते हैं । Students are playing in the ground.

( 2 ) तुम्हारे पास दस फल हैं । You have ten fruits.

( 3 ) ह्यः हम दोनों पुस्तकालय गए थे । Both of us went to library yesterday.

( 4 ) क्या वे सब पढें ? May they study ?

( 5 ) अभिमन्यु भी अर्जुन की तरह वीर था। Abhimanyu was also brave like Arjun.

( 6 ) कल मेरे पिता दिल्ली जाएंगे । My father will go to Delhi tomorrow.

( 7 ) कृपया तुम मेरे लिए पुस्तक लाओ । Please bring water for me.

" ग " खण्ड: ( SECTION C ) अनुप्रयुक्तव्याकरणम् 25 अङ्काः

5. अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं सन्धिविच्छेदं वा कुरुत - ( केवलं प्रश्नचतुष्टयम् ) 1 x 4= 4

( i ) व्याघ्र ! त्वया महत्कौतुकम् आवेदितं <u>यत् + मानुषात्</u> अपि बिभेषि ?

( ii ) <u>सुरभेरिमाम्</u> अवस्थां दृष्ट्वा सुराधिपः तामपृच्छत् ।

( iii ) उद्याने जनाः <u>इतः + ततः</u> चलन्ति ।

( iv ) चौरः एव उच्चैः क्रोशितुमारभत " <u>चौरोऽयम्</u> चौरोऽयम् " इति ।

( v ) तस्मात् रक्षेत् <u>सदाचारं</u> प्राणेभ्योऽपि विशेषतः ।

6. अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्य: चित्वा लिखत -

( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

(i) कश्चित् कृषकः बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत् ।

(क) बलीवर्दः च बलीवर्दः च (ख) बलीवर्दः च बलीवर्दः च ताभ्यां
(ग) बलीवर्दः च बलीवर्दः च तयोः (घ) बलीवर्दः च बलीवर्दः च तैः

(ii) निशायाः अन्धकारे प्रसृते विजने प्रदेशे पदयात्रा न शुभावहा ।

(क) निशायान्धकारे (ख) निशान्धकारः
(ग) अन्धकारे (घ) निशान्धकारे

(iii) वानरः सगर्वं वदति ।

(क) गर्वेण सहितं (ख) गर्वम् अनतिक्रम्य
(ग) गर्वस्य समीपम् (घ) गर्वं गर्वं

(iv) वाचि पटुः धैर्यवान् मन्त्री सभायामप्यकातरः ।

(क) वाचिपटुः (ख) वाक्पटुता
(ग) वाक्पटुः (घ) वाचालः

(v) व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयेन आकुलं चित्तं यस्य सः नष्टः ।

(क) भयाकुलचित्तेन (ख) भयाकुलचित्ता
(ग) भयाकुलचित्तम् (घ) भयाकुलचित्तः

7. अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति - प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्य: चित्वा लिखत -

(केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

(i) विद्वांस एव लोकेऽस्मिन् चक्षुष्मन्तः प्रकीर्तिताः ।

(क) चक्षुष् + मतुप् (ख) चक्षुष् + ठक्
(ग) चक्षुष् + त्व (घ) चक्षुष् + तल्

(ii) तदेवाहुः महात्मानः सम + त्व इति तथ्यतः ।

(क) समता (ख) समत्वम्
(ग) समयः (घ) सामयिकी

(iii) हे जलद ! त्वं नाना - नदी - नद - शतानि च पूरयित्वा रिक्तोऽसि ।

(क) नद + ई (ख) नद + त्व
(ग) नद + मतुप् (घ) नद + ङीप्

(iv) पाषाणी सभ्य + तल् निसर्गे स्यान्न समाविष्टा ।

(क) सभ्यत्वं (ख) सभ्यता
(ग) सभ्या (घ) सभ्यताः

(v) जनाः प्रकृति + ठक् सौन्दर्यं दृष्ट्वा प्रसन्नाः भवन्ति ।

(क) प्राकृतिकः (ख) प्रकृतिकं
(ग) प्राकृतिकं (घ) प्रकृतिक

8. वाच्यानुसारं उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत -

( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

(i) लता :- हे गीते ! त्वया किं ............... ?

(क) लिख्यते (ख) पठ्यते
(ग) खाद्यते (घ) गीयते

( ii ) गीता :- अहं ................ पठामि ।

( क ) भगवद्गीता ( ख ) श्लोकाः
( ग ) चित्रं ( घ ) भगवगीतां

( iii ) लता :- उत्तमम् । ............ तु रामायणं पठ्यते ।

( क ) अहं ( ख ) त्वं
( ग ) मया ( घ ) सः

( iv ) गीता :- अत्युत्तमम् । अनन्तरं .............. किं क्रियते ?

( क ) त्वया ( ख ) त्वं
( ग ) अहं ( घ ) यूयं

9. अधोलिखित - वाक्येषु रिक्तस्थानानि कालबोधकशब्दैः पूरयत - ( केवलं प्रश्नचतुष्टयम् ) 1 x 4 = 4

( i ) " गोदावरी एक्स्प्रेस् " सायं 5 : 30 .................. वादने सिकन्दराबाद् तः निर्गच्छति ।

( ii ) अनन्तरं 7 : 45 ............... वादने वरंगल् गच्छति ।

( iii ) ततः 8 : 00 .................... वादने निर्गच्छति ।

( iv ) ततः विजयवाडम् प्राप्य पुनः 12 : 15 .................. वादने निर्गच्छति ।

( v ) एवं " गोदावरी एक्स्प्रेस् " गच्छत् प्रातः 6 : 00 ..................... वादने विशाखपट्नं प्राप्नोति ।

10. मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत - ( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

मञ्जूषा :- कुतः , अपि , यावत् , श्वः ।

( i ) प्राकृतिक - वातावरणे क्षणं सञ्चरणम् ............. लाभदायकं भवति ।

( ii ) " गङ्गा " ................... निर्गच्छति ?

( iii ) मम मित्रं रमेशः ................ दिल्लीतः आगमिष्यति ।

( iv ) ............ सूर्यः न आगच्छति तावत् प्रकाशः न भवति ।

11. अधोलिखितवाक्येषु रेखाङ्कित - अशुद्धपदाय उचितपदं चित्वा वाक्यानि पुनः लिखत - ( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

( i ) अद्य आकाशं स्वच्छः अस्ति ।

( क ) आकाशेन ( ख ) आकाशस्य
( ग ) आकाशः ( घ ) आकाशे

( ii ) मम समीपे त्रीणि पुस्तकं सन्ति ।

( क ) पुस्तके ( ख ) पुस्तकानि
( ग ) पुस्तकैः ( घ ) पुस्तकेषु

( iii ) वयं संस्कृतश्लोकान् पठन्ति ।

( क ) पठति ( ख ) पठसि
( ग ) पठथ ( घ ) पठामः

( iv ) मम पिता ह्यः ग्रामं गमिष्यति ।

( क ) अगच्छत् ( ख ) अगच्छन्
( ग ) अगच्छम् ( घ ) आगच्छः

*

केन्द्रीय विद्यालय संगठन

## " घ " खण्ड: ( SECTION D ) पठित - अवबोधनम् 30 अङ्काः

12. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5

कश्चित् कृषक: बलीवर्दाभ्यां क्षेत्रकर्षणं कुर्वन्नासीत् । तयो: बलीवर्दयो: एक: शरीरेण दुर्बल: जवेन गन्तुमशक्तश्चासीत् । अत: कृषक: तं दुर्बलं वृषभं तोदनेन नुद्यमान: अवर्तत । स: ऋषभ: हलमूढ्वा गन्तुमशक्त: क्षेत्रे पपात । क्रुद्ध: कृषीवल: तमुत्थापयितुं बहुवारं यत्नमकरोत् । तथापि वृष: नोत्थित: । भूमौ पतितं स्वपुत्रं दृष्ट्वा सर्वधेनूनां मातु: सुरभे: नेत्राभ्यामश्रूणि आविरासन् । सुरभेरिमामवस्थां दृष्ट्वा सुराधिप: तामपृच्छत् - " अयि शुभे ! किमेवं रोदिषि ? उच्यताम् " इति ।

( अ ) एकपदेन उत्तरत । ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) कृषक: काभ्यां क्षेत्रकर्षणं करोति ?

( ख ) तयो: एक: बलीवर्द: केन दुर्बल: आसीत् ?

( ग ) ऋषभ: हलमूढ्वा कुत्र पपात ?

( आ ) पूर्णवाक्येन उत्तरत । ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) कृषक: बलीवर्दाभ्यां किं कुर्वन्नासीत् ?

( ख ) सुराधिप: सुरभिं किम् अपृच्छत् ?

( ग ) कृषीवल: वृषभम् उत्थापयितुं किम् अकरोत् ?

( इ ) निर्देशानुसारम् उत्तरत - ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) " अवर्तत " इति क्रियापदस्य कर्तृपदं किम् ?

( ख ) " क्रुद्ध: कृषीवल: " अत्र विशेषणपदं किम् ?

( ग ) " बलहीनः " इति पदस्य पर्यायपदं किम् अस्ति ?

13. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5

रे रे चातक ! सावधानमनसा मित्र ! क्षणं श्रूयताम्
अम्भोदा बहवो हि सन्ति गगने सर्वेऽपि नैतादृशाः ।
केचिद् वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा ,
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ।।

( अ ) एकपदेन उत्तरत । ( केवलं प्रश्नद्वयम् ) ½ x 2 = 1

( क ) गगने कति अम्भोदाः सन्ति ?

( ख ) कविः चातकपक्षिं कियत् कालं श्रोतुम् इच्छति ?

( ग ) कीदृशं वचः सर्वेषां पुरतः न वक्तव्यम् ?

( आ ) पूर्णवाक्येन उत्तरत । ( केवलं प्रश्नद्वयम् ) 1 x 2 = 2

( क ) अम्भोदाः कथं वसुधाम् आर्द्रयन्ति ?

( ख ) के वृथा गर्जन्ति ?

( ग ) कुत्र दीनं वचः न वक्तव्यम् ?

(इ) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) "गगने हि बहवः अम्भोदाः सन्ति" इति वाक्ये कर्तृपदं किम् अस्ति ?

(ख) "भूमिं" इति पदस्य समानार्थकपदं श्लोके किम् अस्ति ?

(ग) "वचः" इति पदस्य विशेषणपदं श्लोके किमस्ति ?

14. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत - 5

पिक: :- अलम् अलम् अतिविकत्थनेन। किं विस्मर्यते यत् -

काक: कृष्ण: पिक: कृष्ण: को भेद: पिककाकयो: ।
वसन्तसमये प्राप्ते काक: काक: पिक: पिक:॥

काक: :- रे परभृत् ! अहं यदि तव सन्ततिं न पालयामि तर्हि कुत्र स्यु: पिका: ? अत: अहम् एव करुणापर: पक्षिसम्राट् काक: ।

गज: :- समीपत: एवागच्छन् अरे ! अरे ! सर्वां वार्तां श्रुण्वन्नेवाहम् अत्रागच्छम् । अहं विशालकाय:, बलशाली , पराक्रमी च । सिंह: वा स्यात् अथवा अन्य: कोऽपि । वन्यपशून् तु तुदन्तं जन्तुमहं स्वशुण्डेन पोथयित्वा मारयिष्यामि । किमन्य: कोऽप्यस्ति एतादृश: पराक्रमी । अत: अहमेव योग्य: वनराजपदाय ।

(अ) एकपदेन उत्तरत। (केवलं प्रश्नद्वयम्) ½ x 2 = 1

(क) कौ कृष्णौ स्त: ?

(ख) क: परभृत् कथ्यते ?

(ग) गज: किं श्रुण्वन्नेव आगच्छत् ?

(आ) पूर्णवाक्येन उत्तरत। (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) काकस्य पिकस्य च भेद: कदा ज्ञायते ?

(ख) काकस्य प्रशंसां श्रुत्वा पिक: किं वदति ?

(ग) गज: कीदृश: अस्ति ?

(इ) निर्देशानुसारम् उत्तरत - (केवलं प्रश्नद्वयम्) 1 x 2 = 2

(क) "अहं जन्तुं पोथयित्वा मारयिष्यामि" इति वाक्ये कर्तृपदं किम् अस्ति ?

(ख) "तुदन्तं जन्तुम्" इत्यनयोः विशेष्यपदं किम् ?

(ग) नाट्यांशे "बलहीनः" इति पदस्य विलोमपदं किं प्रयुक्तम् ?

15. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (केवलं प्रश्नचतुष्टयम्) 1 x 4 = 4

(क) भृङ्गाः रसालमुकुलानि समाश्रयन्ते ।

(ख) धैर्यवान् मन्त्री कदापि परैः न परिभूयते ।

(ग) नराणां प्रथमः शत्रुः क्रोधः अस्ति ।

(घ) वाल्मीकिः लवकुशयोः मातरं वधूरिति आह्वयति ।

(ङ) प्रकृत्याः सन्निधौ वास्तविकं सुखं विद्यते ।

16. मञ्जूषात: समुचितपदानि चित्वा अधोलिखितश्लोकस्य अन्वयं पूरयत - 1 x 4 = 4

आलस्यं हि मनुष्याणां शरीरस्थो महान् रिपु: ।
नास्त्युद्यमसमो बन्धु: कृत्वा यं नावसीदति ॥

अन्वय: :- मनुष्याणां ( i ) ..................... आलस्यं हि ( ii ) .................. रिपु: ( अस्ति ) ।
उद्यमसम: ................. न अस्ति , ( मनुष्य: ) यं ............... न अवसीदति ।

मञ्जूषा :- बन्धु: , कृत्वा , महान् , शरीरस्थ: ।

अथवा ( OR )

मञ्जूषाया: साहाय्येन प्रदत्तश्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुन: लिखत - 1 x 4 = 4

आश्वास्य पर्वतकुलं तपनोष्णतप्तम्
उद्दामदावविधुराणि च काननानि |
नानानदीनदशतानि च पूरयित्वा ,
रिक्तोऽसि यज्जलद ! सैव तवोत्तमा श्रीः ||

भावार्थ: :- हे जलद ! त्वं ( i ) ..................... उष्णेन तप्तं पर्वतानां समूहं शीतलं कृत्वा , उन्नत - वृक्ष - रहितानि ( ii ) ................... च आश्वास्य , अनेकासां नदीनां नदानां च शतानि ( iii ) .................. । तदनन्तरं त्वं रिक्तः भवसि , तदेव तव उत्तमा ( iv ) .................... भवति ।

मञ्जूषा :- पूरयसि , संपत्तिः , तपनस्य , अरण्यानि ।

17. अधोलिखित - कथांशं समुचितक्रमेण लिखत - ½ x 8 = 4

( क ) रामः लवकुशौ अङ्कमुपवेशयति ।
( ख ) उभौ स्व - नामनी वदतः।
( ग ) सर्वे निष्क्रान्ताः ।
( घ ) लवकुशयोः गुरुः वाल्मीकिः अस्ति ।
( ङ ) विदूषकेन सह कुशलवौ प्रविशतः ।
( च ) तपोवनवासिनः सीतां देवीति नाम्ना आह्वयन्ति ।
( छ ) लवः रामं प्रति " अस्माकं वंशस्य कर्ता सहस्रदीधितिः " इति वदति ।
( ज ) कुशलवौ रामं प्रणमतः ।

18. अधोलिखितवाक्येषु रेखाङ्किकपदानां प्रसङ्गानुकूलम् प्रदत्त - विकल्पेभ्यः उचितार्थं चित्वा लिखत - ( केवलं प्रश्नत्रयम् ) 1 x 3 = 3

( i ) " तयो: बलीवर्दयो: एक: शरीरेण दुर्बल: <u>जवेन</u> गन्तुमशक्तश्चासीत् " ।
( क ) वायुना ( ख ) सुखेन
( ग ) वेगेन ( घ ) शक्त्या

( ii ) " वानरः सिंहस्य <u>कर्णम्</u> आकृष्य पुनः वृक्षोपरि आरोहति " ।
( क ) श्रोत्रं ( ख ) नेत्रं
( ग ) पुच्छं ( घ ) पादं

( iii ) " दुर्दान्तैः <u>दशनैः</u> अमुना स्यान्नैव जनग्रसनम् " ।
( क ) कठिनैः ( ख ) शास्त्रैः
( ग ) कोमलैः ( घ ) दन्तैः

( iv ) " परित्यज्य फलं पक्कं भुङ्क्तेऽपक्कं विमूढधीः " ।

( क ) बुद्धिमान् ( ख ) मूर्खः

( ग ) पण्डितः ( घ ) जनः

************************************************************************************************************

CLASS :- 10 , SANSKRIT , Code -122. उत्तराणि / KEY Time : 3 hrs Marks : 80

************************************************************************************************************

" क " खण्ड: ( SECTION A ) अपठित - अवबोधनम् 10 अङ्काः :

1. ( अ ) आश्रमे , वशिष्ठस्य , नन्दिनी | 1 x 2 = 2

( आ ) ..... वशिष्ठस्य " आत्मबलं " दृष्ट्वा ...... |

..... स्व - सैनिकान् तां धेनुं हर्तुम् आदिष्टवान् |

..... " कोऽपि मम आज्ञां विना एनां धेनुं स्प्रष्टुम् अपि न शक्नोति " इति ...... | 2 x 2 = 4

( इ ) विश्वामित्रः / वशिष्ठः / नन्दिनी / अन्यत् यत्किमपि यथोचितम् ............ 1

( ई ) ( ग ) विश्वामित्रः , ( ख ) वशिष्ठः , ( घ ) विस्मितः , X ( क ) गुणान् 1 x 3 = 3

" ख " खण्ड: ( SECTION B ) रचनात्मकम् कार्यम् 15 अङ्काः

2. दिल्लीतः, सोमेश, सस्नेहं ,सर्वगतं, प्राप्तवान् ,आनन्ददायकः, गणितविषये , त्वं , कार्याणि , भवदीयः । ½ x 10 = 5

3. चित्रस्य वर्णनं शुद्ध - कर्तृ - क्रिया - पादानाम् आधारेण पूर्ण - अङ्काः देयाः |

कर्तृ - क्रियान्विति: अनिवार्या | 1 x 5 = 5

4. ( 1 ) क्रीडाक्षेत्रे बालकाः क्रीडन्ति । ( 2 ) तव समीपे दश फलानि सन्ति ।

( 3 ) ह्यः आवां पुस्तकालयं अगच्छाव / गतवन्तौ । ( 4 ) किं ते पठन्तु ?

( 5 ) अभिमन्युः अपि अर्जुन इव वीरः आसीत् । ( 6 ) श्वः मम पिता दिल्लीं गमिष्यति ।

( 7 ) कृपया त्वं मह्यं / मदर्थं जलम् आनय । 1 x 5 = 5

" ग " खण्ड: ( SECTION C ) अनुप्रयुक्तव्याकरणम् 25 अङ्काः

5. ( i ) यन्मानुषात् ( ii ) सुरभेः + इमाम् ( iii ) इतस्ततः ( iv ) चौरः + अयम् ( v ) सत् + आचारः । 1 x 4 = 4

6. ( i ) ( ख ) बलीवर्दः च बलीवर्दः च ताभ्यां , ( ii ) ( घ ) निशान्धकारे ,

( iii ) ( क ) गर्वेण सहितं , ( iv ) ( ग ) वाक्पटुः , ( v ) ( घ ) भयाकुलचित्तः । 1 x 4 = 4

7. ( i ) ( क ) चक्षुष् + मतुप्, ( ii ) ( ख ) समत्वम् , ( iii ) ( घ ) नद + ङीप् ,

( iv ) ( ख ) सभ्यता , ( v ) ( ग ) प्राकृतिकं । 1 x 4 = 4

8. ( i ) ( ख ) पठ्यते , ( ii ) ( घ ) भगवगीतां , ( iii ) ( ग ) मया , ( iv ) ( क ) त्वया । 1 x 3 = 3

9. ( i ) सार्धपञ्च , ( ii ) पादोन अष्ट , ( iii ) अष्ट , ( iv ) सपाद द्वादश , ( v ) षड् । 1 x 4 = 4

केन्द्रीय विद्यालय संगठन

10. ( i ) अपि , ( ii ) कुतः , ( iii ) श्वः , ( iv ) यावत् । 1 x 3 = 3

11. ( i ) ( ग ) आकाशः , ( ii ) ( ख ) पुस्तकानि , ( iii ) ( घ ) पठामः , ( iv ) ( क ) अगच्छत् । 1 x 3 = 3

“ घ ” खण्ड: ( SECTION D ) पठित - अवबोधनम् 30 अङ्काः

12. ( अ ) बलीवर्दाभ्याम् , शरीरेण , क्षेत्रे । ½ x 2 = 1

( आ ) .... क्षेत्रकर्षणम् .... ।

.... “ अयि शुभे ! किमेवं रोदिषि ? उच्यताम् ” इति .... ।

.... बहुवारं यत्नम् अकरोत् । 1 x 2 = 2

( इ ) कृषकः , क्रुद्धः , = दुर्बलः । 1 x 2 = 2

13. ( अ ) बहवः , क्षणं / क्षनकालं , दीनं । ½ x 2 = 1

( आ ) .... वृष्टिभिः ... । केचिद् अम्भोदाः .... ।

यं यं पश्यसि तस्य तस्य पुरतो .... । 1 x 2 = 2

( इ ) अम्भोदाः , = वसुधां , दीनं | 1 x 2 = 2

14. ( अ ) पिककाकौ , पिक: , सर्वां वार्तां । ½ x 2 = 1

( आ ) .... वसन्तसमये प्राप्ते .... । .... “ अलम् अलम् अतिविकत्थनेन ” इति .... ।

....विशालकाय: , बलशाली , पराक्रमी च .... । 1 x 2 = 2

( इ ) अहं , जन्तुम् , x बलशाली 1 x 2 = 2

15. के , कीदृशः , कः , कयोः , कस्याः । 1 x 4 = 4

16. अन्वयः :- शारीरस्थ: , आलस्यं , बन्धु: , कृत्वा । अथवा / OR

भावार्थः :- तपनस्य , अरण्यानि , पूरयासि , संपत्तिः । 1 x 4 = 4

17. 1. ( ङ ) विदूषकेन सह कुशलवौ प्रविशतः ।

2. ( ज ) कुशलवौ रामं प्रणमतः ।

3. ( क ) रामः लवकुशौ अङ्कमुपवेशयति ।

4. ( छ ) लवः रामं प्रति “ अस्माकं वंशस्य कर्ता सहस्रदीधितिः ” इति वदति ।

5. ( ख ) उभौ स्व - नामनी वदतः ।

6. ( घ ) लवकुशयोः गुरुः वाल्मीकिः अस्ति ।

7. ( च ) तपोवनवासिनः सीतां देवीति नाम्ना आह्वयन्ति ।

8. ( ग ) सर्वे निष्क्रान्ताः । ½ x 8 = 4

18. ( i ) वेगेन ( ii ) श्रोत्रं ( iii ) दन्तैः ( iv ) मूर्खः । 1 x 3 = 3

**********************************************************************************************

केन्द्रीय विद्यालय संगठन